स्ति संशयः ॥ ९३ ॥ यदि कार्यान्तरे स्वामी नियोजयति मां तदा ॥ तत्क्षणेनैव कर्तव्यं मया साध्यं न जगत्त्रये ॥ ९४ ॥ अवश्यं तत्र तस्यास्त
द्दर्शनं मम दुर्लभं ॥ तस्यास्त्वयानुकेनापि कर्तुमेव न शक्यते ॥ ९५ ॥ सा चेत्कृपाविहारं चेत्करिष्यति तदा कथं ॥ अस्माकं प्रतिबंधो
पि कर्तव्यः सादरं वद ॥ महाप्रभुत्वमेवापाः शंकरस्य यथा तथा ॥ तदग्रेव कुमित्राविकथं वा भवति स्फुटं ॥ कोटियोजनदूरस्था
सुरास्सर्वेप्युत्सादराः ॥ पूजार्थमागतास्तेषां दर्शनं जातमेव न ॥ प्रयाणे तत्परीभ्रांताः खेदधारापरिप्लुताः ॥ तद्धाराभिः समुद्रो
पि पूर्णोप्युद्वेलतां गतः ॥ देवागमाभ्रपयाद्याः प्रपातस्ताः पुनः पुनः ॥ भ्रांता नैव कमलायास्तासु दृष्टिर्न सर्वथा ॥ १०० ॥ वि
मानरत्नमारूढा मृडानी संस्थिता तदा ॥ उत्सर्पंति सुरास्सर्वे स्वस्वदारसमावृताः ॥ अहो सत्कोत्सवस्तावद्वाङ्मनसगोचरः ॥ त
द्विहारप्रभावोपि देवानामप्यगोचरः ॥ २ ॥ अहो शिवविलासोयं विलासः शोभते हि ॥ तद्दर्शनेन पुण्यानां राशिभिर्वापि जायते
तदागमनवेलायां उत्साहो यादृशः पुरा ॥ तादृशो न कदाप्यग्रे भविष्यति विशेषतः ॥ विलक्षणस्स समयः शिवागमनसंयुतः
तालितूर्याण्यपि तेवार्त्ताः तादृशाः पुष्पवृष्टयः ॥ तज्जयध्वनयो दिव्याः तलिनिगोत्रापिये सुरैः ॥ कृतानि श्रवणेनापि सिद्धिदानि पदे प
दे ॥ सिद्धानामपि संमर्दो गंधर्वाणां च कोटिशः ॥ किंनराणां मुनीनां च वक्तुमेव न शक्यते ॥ वेत्रप्रहारसंत्रस्ताः सर्वे नारायणादयः ॥ अ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अद्यापिरूपसंपन्नाः सुरनारीगणैस्सह ॥ संत्रस्ताअपिसानंदाः सर्वेनारायणादयः ॥ सर्वाग्निविषयतांत्वाममनोविषयतामपि ॥
नदृष्टंभवतांभाग्यंतत्संमदोवलोकने ॥ रत्ननीराजनानेनराजयंस्तत्तथाविधाः ॥ १० ॥ देवांगनाभिः सर्वाभिः नदृगानपुरस्सरं ॥ नी
राजनानिदत्तानितेषांसंख्यानसर्वथा ॥ नीराजनप्रभावृष्टमेरुकूटप्रभाकरः ॥ सकिंत्वदृष्टसहसा भवद्भिर्मेरुकूटगैः ॥ मन्नेत्रा
णांफलंजातंतत्संमदोवलोकने ॥ शंकरस्यैवकृपया तत्फलंजातमद्यमे ॥ १३ ॥ तत्फलेनपवित्रस्यममभीतिर्नसर्वथा ॥ शंकरेणापि
तद्ज्ञातमतःकेनभयंमम ॥ ससर्वज्ञोमहादेवःकुपितः किंमयिप्रभुः ॥ अज्ञातेत्वंमयिज्ञातंतेनाद्यागमनोत्सवे ॥ इदानींसंप्रविष्टा
स्तिकैलासभवनांतरे ॥ तत्रास्माकंप्रवेशःकिंएनस्याङ्गमेनसंश्रा ॥ अतः परंप्रयत्नोपिकर्तव्योभवतांयदि ॥ सामर्थ्यंतच्चवार्तावाकः
करिष्यतिसत्वरं ॥ १७ ॥ एवंवदत्सुसर्वेषुगणेष्वन्योन्यमादरात् ॥ वाणीकापिसंजाता[illegible]नैवाशरीरिणी ॥ अंबप्रयातुशैलेंद्रोमे रामः
न्यासहमंदिरं ॥ स्वमंदिरपरिष्कारः कर्तव्यस्तेनकिंशिवे ॥ विलंबोपिक्रियासंवांशिवदर्शनलालसे ॥ शिवानुग्रहवांछायां विलंबोपु १८
रुषएवन ॥ २० ॥ इतितद्वचनंश्रुत्वासिंहमारुह्यशैलजा ॥ प्रेषयामासशैलं[illegible] सर्वसंपत्समन्वितं ॥ २१ ॥ सादृष्टागिरिणापुनः पुनरु
मादृष्टाथसामातरं सादृष्टवापितयापुनः पुनरपिप्रेम्णापुनर्दर्शने ॥ इच्छांसापिचकारसोपिगिरिराडानंदधाराधृतः प्राहांबाम
न्तारमंबकृपयामांवज्ञयपश्यसपि ॥ २२ ॥ इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्येतृतीयांशेव्यासमुनिसंवादेनाम
सप्तमोध्यायः ७ ॥ ॥ श्रीव्यासउवाच ॥ आरुह्यसिंहमंबासाक्षणमात्रंततः परं ॥ शंकरप्रेषितेदिव्यविमानवरमाश्रिता ॥ १ ॥ त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मिन्विमाने संविश्य यदा शंकरवल्लभा ॥ तदा दुंदुभयो नेदुः जयशब्दपुरस्सरं ॥ २ ॥ ततस्ते प्रमथास्सर्वे शार्वीश्वरणांबुजं । स्मृत्वा
प्रहृष्टाः प्रणताः पुनःपुनरस्तुवन् ॥ ३ ॥ तूर्यदुंदुभिघोषैस्ते जयध्वनिपुरस्सरं ॥ वेत्रहस्ताः प्रचलिताः कंपयंतः सुरान् रुषा ॥ ४ ॥ शिव
नामानुवादेन शिवासंतोषहेतुना ॥ सानंदास्ते च सर्वेपि धावंतः पुरतो बभुः ॥ श्रुत्वा नामानि तान्येवामनोहानि शिवप्रिया । आनं
दपरिपूर्णा सा स्मरंती शंकरं मुदा ॥ ६ ॥ शिवनामानि गायंति मधुरं मधुरस्वरं ॥ मधुराक्षरसंपन्नान्यनुवारं शिवप्रिया ॥ ७ ॥ शिवहर
भव भर्ग भीम शंभो स्मरहर शंकर शर्व चंद्रमौले । त्रिनयन वृषकेतनानलाक्ष । गौरीश गिरिश मृड ईश रुद्र पाहि ॥ ८ ॥ शंभो मयि भवेदुरो
रवरमहादेव स्मरारे हर श्रीकंठ शर्म हेश शंकर मृत्युपाशात् । माव... ॥ ९ ॥ ... सोमभगवन् शूलिन् कपर्दिन् शिव श्रीम
त्सं जय विश्वनाथ गिरिश श्रीवामदेव नमो ॥ १० ॥ शंभुं शंकरमीशं ... भुमाकांतं महेशं शिवं शर्वं रुद्रमनंगदक्षमथनं मृत्युंजयं शं
करं । भर्गं भूतपतिं भवं पशुपतिं कालाक्षमुक्षध्वजं भीमं दिग्वसनं मृडं हरमजं श्रीकंठमीशं भजे ॥ १० ॥ शंभो कापि न लारका
पि न वा चेन्द्रो न वा भानुमान्न्यः कोपि सुरात्र कुत्र वसति श्रीचंद्रमौले तव ॥ प्रासादद्युतिकोटिकोटिघटिता हृष्टिर्ममाद्याधुना
विद्युत्संघसमावृतेव सकलान् सर्वात्मना कुंठिता ॥ ११ ॥ एतन्निर्मितमत्र किमपि मयस्थानं प्रभामंडलैः माध्यं मंडितमेव मंडलमि
दं किं मंडनं वांछति । स्थानं नैव विलोकते घनतरं गंभीरमेतादृशं तेजःपुंजघनं घनांतरमिदं नापेक्षते सर्वथा ॥ १२ ॥ यत्रानंतसुरा
दिसेवकगणाः त्रस्ताः स्वनारीगणैः साकं शोकदवे विवर्जिताः प्रतिदिनं केषायमाना अपि । सेवंते तत उत्तमं स्थलमुमाकांतो विहायात्र

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रा०५

किं तिष्ठ त्वत्र महाप्रभुं मंतरम्यं स्थलं केवलं ॥१३॥ व्यास उवाच ॥ इत्युक्त्वा सा शिवा तस्मिन्विमाने विपुले स्थिता । एकैवाहं वसा
मीति चिंताव्याकुलमानसा ॥१४॥ महेशानिकटे तावद्देवगे तुं न शक्यते । परिचर्यार्थमन्यान्याः कल्पनीया मनोरमाः ॥ मयैव यदित
त्राद्य गम्यते शंकरोपि माम् । विलोक्य सादरं किं मां वदिष्यति विशेषतः ॥१६॥ एकाकिनी कथं नारी विमाने विपुले स्थिता । नारी परि
जनाक्रांता नारी तावद्विराजते ॥ अमरप्रवरा ध्यागम हमेकाकिनी कथं । गंतुमभ्युद्यता धीरा चार शंकरसंनिधिं । इत्यालोच्य तदा गौ
री दिव्यसौंदर्यविग्रहान् । ससर्ज क्षणमात्रेण कोटिशो मुनिपुंगवाः ॥१९॥ रत्नाभरणसंपन्नाः यौवनाक्रांतविग्रहाः । रूपलावण्य
संपन्ना नवा एव प्रतिक्षणं । विचित्रमाल्यवसना सुरनारीविनिंदकाः । रूपेणानलतुल्येन स्वयौवनमदेन च ॥२१॥ रुद्रवीणाः स
मादाय ताः सर्वाश्च पृथक् पृथक् । शिवनामानि दिव्यानि गायंति स्म मनोहराः । तासां नामालि शृण्वंती परमानंदरूपिणी । साक् रामः
स्वापीमुदं प्राप सच्चिदानंदलक्षणा ॥ आदाय स्वयमप्येकां वीणां वाणी सुखालसा । वीणां प्रवीणा रुद्राणी गानतानरतावभौ । १९
न तत्स्थानं विजानंति गंधर्वाः किं नरा अपि । तथान्योपि सुरास्सर्वे सुरनारीगणा अपि ॥ एवं नानाविलासवीता चामरकोटिभिः
छत्रार्बुदच्छायया चापि संछन्ना सा मयूरो शिवा ॥२६॥ शंकरस्तत्समारंभं ज्ञात्वा तत्रोपकारणं ॥ पुनः संप्रेषयामास गणानमितविग्रहान्
याषिद्रूपांश्च विविधान् नानाभरणभूषितान् । सौंदर्यभेदसंपन्नान्मानलीलान्मनोहरान् ॥ गणा तूर्णं ध्वनिं श्रुत्वा तज्ज्ञानमपि द्रु
रतः । अश्रुतं गानमेतावत् क्व समित्याह शांभवी ॥२९॥ प्रायः सोयं शिवेनैव तापः संपादितो मम । अपूर्वनारी सध्वाप्ति गानस्य चापि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शंकरः शंकरस्त्वं महादेवः शंकरस्त्वं स्वकं पुनः ॥ अवृत्तं कर्त्तुमेवेदं सर्वं सर्वमिति स्मृतं ३१ ॥ अशक्यं किं महेशस्य मदनुग्रह
वांछया ॥ सृष्टमेतादवधुना विविधं चंद्रमौलिना ३२ ॥ मयितावत्स्वपादृष्टिरद्यापि गिरिशस्य सा ॥ सातावद्दक्षिणीयामे विरू
पाक्षावलोकनात् ॥ मत्कृतापि चिरं बोध्यविस्मृतश्चंद्रमौलिना ॥ कृपालुत्वं मयि स्वामी प्रकटं कर्त्तुमिच्छति ॥ तस्य देवाधिदेवस्य
शंकरस्य महात्मनः ॥ मदनुग्रहरा ज्ञापितप्रसा भयसा विस्ता ३४ ॥ इत्या ते अथ मुनगौरि महेशार्पितं भवो ॥ नारीणां मत्यितद्
त्वा प्रहृष्टा सा पुनः पुनः ॥ ततस्ताः सुरनारीणां पराभवविचक्षणाः ॥ इंद्र प्रणताः सर्वाः स्तुति पूर्वक मादरात् ३७ ॥ नीराजना
निदत्तानि दिव्यरत्नगवाश्रिया ॥ नानाम पिगपाकीर्णपात्राण्यासाय कोटिशः ॥ उपहाराननेकांश्च तदानीतानुगिरींद्रजा ॥ शि
वनैवेद्यशेषत्वबुध्या जग्राह सादरं ॥ नान्यास्वाद्य विचित्राणि फलानि जगदंबिका ॥ कृतार्थत्वमतिं चक्रे शिवनैवेद्यसेवनात् ४० ॥
दुर्लभं शिवनैवेद्यं अद्य प्राप्तं मयाधुना ॥ पावनं चित्तमथाद्य पावनानांच पावनं ॥ ४१ ॥ शिवनैवेद्यकोटींशकोट्यंशो यति दु
र्लभः ॥ संपूर्णं शिवनैवेद्यं कस्य वा सुलभं भवेत् ४२ ॥ पुरोडाशं धिक्करोति शिवनैवेद्यमीदृशं ॥ पुरोडाशी किमेतावद्दक्षितेः फल
माप्यते ॥ लक्षं यागसहस्राणाप्यलं योगं बुदैरपि ॥ भक्षिते शिवनैवेद्ये शिवसायुज्यमाप्नुयात् ॥ अतः परं शंकरस्य सन्निधानम
विघ्नितं ॥ येनेदं शिवनैवेद्यमकस्मात्समुपागतं ४५ ॥ नयद्यपि सुधातावदधुना मतथापि किं ॥ नोपलक्षणीयं सहसा शिवनैवेद्यमाग
तं ॥ दृष्टेपि शिवनैवेद्ये यांति पापानि दूरतः ॥ भुक्ते तु शिवनैवेद्ये पुण्यान्यायांति कोटिशः ४७ ॥ दूरतः शिवनैवेद्यगंधोप्याघ्रायमानके नन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रा पापसंघास्तु सहस्राः प्रलयं यान्ति वस्तुतः ॥ यद्गृहे शिवनैवेद्यप्रचारोपि प्रजायते ॥ तद्गृहं पावनं सर्वं अन्यपावनकारणं ॥ आ
गतं शिवनैवेद्यं गृहीत्वा शिरसा मुदा ॥ भक्षणीयं प्रयत्नेन शिवस्मरणपूर्वकं ॥५०॥ क्षीरं वा फललेह्यं वा जलं वा शंकरार्पितं ॥ गृही
त्वा मुच्यते सद्यः पापकोटिगणादपि ॥५१॥ आगतं शिवनैवेद्यमन्यथा ग्राह्यमित्यपि ॥ विलंबे पापसंबंधो भवत्येव हि मानवः ॥५२॥
नयस्य शिवनैवेद्यग्रहणेच्छा न जायते ॥ स पापिष्ठः गरिष्ठः स्यान्नरकं यात्यपि ध्रुवं ॥ इत्युक्त्वा शिरसा गौरी तानि सर्वाणि सादरं ॥ आ
स्वाद्यास्वाद्य संतुष्टा शंकरस्मरणोत्सुका ॥५४॥ महेशपितृशांता सुधामास्वाद्य शैलजा ॥ पुनः पुनः पयोभक्त्या धाराभक्तापुनीमिव ॥
ततस्तांबूलमादाय शिवार्पितमनुत्तरं ॥ तत्कृतं गानमाकर्ण्य नाट्यं द्रष्टुं समुद्यता ॥ ततस्तत्कृतनाट्यानि विचित्राणि विशेषतः ॥
दृष्ट्वा विस्मयमापन्ना गानाकर्णनतत्परा ॥५७॥ नैकेनापि कृतं नाट्यपूर्वं ... ॥ ... स्वासेपि विलासा ख्याता दृशं न दृष्टलक्षणं ॥ राम:
मन्नीस्सर्थमिदं सृष्टं नाट्यमीशेन वस्तुतः ॥ मयि तावत्कृपा शंभो रघुनाथनंदन ... ॥५९॥ इदं वाद्यं विहायाग्रे गंतुमेव न शक्यते ॥ आ २०
यः शिवापराधोपि गमनेन भविष्यति ॥६०॥ ... ॥ एतद्विहाय गमने प्रत्यवायो भविष्यति ॥ अस्य
नाट्यस्य समयः क्रियानारंभमात्रतः ॥ संतोषराशयो वृद्धाः किमयं भवि... ॥ नेत्रत्रयेणापि नाट्यं द्रष्टुमेव न शक्यते ॥ सहस्रेणा
पि नेत्राणां रूपाद्यर्बुदेन वा ॥ किं ... पि नेत्राणि विशालान्यमलानि च ॥ तेनाट्यमीदृशं दृष्ट्वा संतुष्टा न भवामि किं ॥६४॥ इति
गौरी विचार्यादौ ससर्ज नयनानि सा ॥ विपुलानि विचित्राणि रम्याण्यपि विनोदतः ॥६५॥ तैर्नेत्रैस्तादृशं नाट्यं विलोकयामास तत्क्षणं ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संतुष्टास्वस्वरूपं च विस्मृत्य विव्हलास्थिता ॥ ६६ तेनाद्यालोकनेनैव नीतः कालः कियानपि ॥ प्रतिक्षणं नवं नाद्यं केन वार्तेन दृश्य
ते ॥ तेनाद्यवार्त्ताश्रवणं हृत्वा रंभादिका अपि ॥ विस्मयाविष्टहृदयाः पुरा देवेंद्रमंदिरे ॥ ६७ ॥ प्रतिक्षणं नवं नाद्यं कथं ताभिः कृतं तदा ॥ ना
द्यविद्यापि सा सम्यान तत्तद्विषयं खलु ॥ ६९ ॥ विचित्रं निर्मितं नाद्यं तद्विद्यामानसंमतं ॥ तादृशं नाद्यमीशेन स्पष्टमत्राभुतं च किं ॥ वि
चित्रसृष्टिकरणे समर्थः शंकरः खलु ॥ ततस्तत्रापि किं चित्रं तदस्माकं हि दुर्लभं ॥ ७० ॥ प्रासादः खलु संदिष्टो स्त्रिशंकरेण स तादृशः ॥ न
यादृशः स्वर्गलोके सद्भ्यो विष्णुपदे पि वा ॥ तथैव नाद्यसृष्टिस्या स्यादि [illegible] न तत्र सा स्मृता ॥ तावता पि हि महत्त्वमहत्त्वे पि न नस्मृतिः ॥ या विद्या
स्वर्गलोके पि तदस्मासा सा न चेतदा ॥ अस्माकमहता सेयं मभ्यस्त्वा ह्यातिलक्षणा ॥ अस्माकं तादृशं भाग्यं तद्विद्याभ्यसने कुतः ॥ सा
विद्या परमा विद्या शंकरेणा विनिर्मिता ॥ दैवादत्र समायाति हृपयात्रां [illegible] रस्य सा ॥ अभ्यासस्तत्र कर्तव्यस्तदागमनमेव न ॥ गानवा
र्ता श्रुता पूर्वं तद्गानं न तत्र सर्वथा ॥ नर्तनागारविद्या च दृष्ट्वा सापि कथं भवेत् ॥ किं च सौंदर्यधारापि दिव्यनाद्यांगनाश्रिता ॥ साधार
के न वा लभ्या सा किलासां न दुर्लभा ॥ ७८ ॥ प्रतिक्षणं नवं तासां सौंदर्यमतितोषदं ॥ तत्कृतं प्राप्यते लोके दुर्लभं तदिति स्मृतं ॥ त
द्वांछां कमला तावद्धुनापि करोति सा ॥ वापीशचीच [illegible] या चतादिहास्तं तद्दुर्लभं ॥ ८० ॥ किं वांछया फलप्राप्ति विलक्षणफलोदयः ॥
भूरिपुण्यतपो लभ्यः तत्तपस्तासु कुत्र वा ॥ ८१ ॥ कैलाससदनावासः शिवदासीगणस्य तु ॥ न सौंदर्यं न लोकेऽत्र सुरनारीषु सर्वथा ॥
८२ कैलासदासीवदनं दृष्ट्वा दृष्ट्वा पुनः पुनः ॥ कमलालज्जया तावद्दूरान्नम्रमुखी स्थिता ॥ कुरूपं सृष्टमीशेन किमेतन्मम दुर्भगा ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सा हृतपस्यया शंभुः प्रीतो भवत्तया खलु ८४ सौंदर्यमेव नारीणां वनिधिस्तेन विना सुखं न प्राप्यते हि नारीभिर्धनलाभेपि भूरिशः ८५ न चाभरणवांछापि सौंदर्ये सति यौवने दुर्लभं तद्धि संप्राप्य नारी किंचिन्मनोरमा नारीरत्नमिति प्रोक्तं रम्यसौंदर्ययौवनैः तदभावे तु या भार्या पतितं तत्तु पंचवरं ८७ पातिव्रत्यं यौवनं च सौंदर्यं च विशेषतः शंकरानुग्रहेणैव नारीभिः प्राप्यते परं ८८ शिव दासी मुखं दृष्ट्वा न प्राकाम सुरांगना वैरूप्याश्रयतां ज्ञात्वा कास्वलिंगं च कारन ८९ तद्दासी यो जनस्यापि वैरूप्यं यम हत्तरं तन्नाम रंगनाप्राप्यं तदन्यत्र कुतो भवेत् ९० तादृशं भाग्यमन्याभिर्बहुजन्मतपस्यया कृतयापि न संप्राप्यं शंकरानुग्रहं विना ९१ अकस्माद्यदि संप्राप्य शंकरानुग्रहस्तदा सर्वभाग्यसमाकीर्णा तु पौभवत्यवंनापि ९२ कुर्वंति तपसा प्रीतं शंकरं लोकशंकरं संसारवासित्वापि तद्ध्यानीयाः फलं च न ९३ किंच यद्यत्फलं रम्यं विरुलं यामनुत्तमं तदनुग्रहमात्रेण शंकरस्य प्रजायते ९४ शंकरानुग्रहे बीजं शिवलिंगसमर्चनं तदर्चनेन यत्प्राप्यं तत्प्राप्यं नान्यधर्मतः ९५ धर्मैः कोवा भवेद्येन सुप्रीतः शंकरो भवेत् शिवलिंगार्चनं त्यक्त्वा तदर्चनमनुत्तमं ९६ किंच मुख्यः स्वर्गलोकः शिवलोक इति श्रुतः [illegible] नूलोके पुंपदुजे स्थीयते शांकरैः परं ९७ नः स्वर्गनाममात्रेण स्वर्गलोकोयमीदृशः शास्त्रेषु स्वर्गशब्दार्थः प्रसिद्धः सतु नान्यतु दुःखान्यत्र बहून्येव सुखैरीश्रुतान्यपि दुःखाक्रांतः स्वर्गलोकः कथं वा शास्त्रनिश्चितः ९९ मुख्यः स्वर्गाख्यया ख्यातः कैलास इति विश्रुतः नायं स्वर्गः स्वर्गवार्त्ता भ्रांतानामत्र केवलं १०० किंचयदुर्लभं लोके सर्वेषामपि तादृशं लिंगार्चनेन संप्राप्यमन्यत्प्राप्यं न सर्वथा १ अधिकारोपि लोकेस्मिन् दुर्लभः शिवपूजने राम: २१

तस्मिन्नृत्यति किमप्यंपरं शंकरे प्रजने ॥ २ तथापि तादृशं नाट्यं दृष्ट्वा गौरी मनोहरं तदानविरता ज्ञाता तन्नाट्यावलोकनात् ३
अभिनवं शिवदासीनाट्यमानंददायिनः गिरिवरतनया सा साक्षात् ददर्शाप्यतस्मात् अनुगतमनुवृत्तावर्त्तमाना विमाने पुनरपि शिवदा
सीनाट्यलीलावभूव १०४ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे गौरीरहस्ये तृतीयांशे व्याससमुनिसंवादे नाम अष्टमोऽध्या
यः ८ ॥ व्यास उवाच नाट्यावलोकनानंदपारावारवेरः परं गौरी समागतारेजे तन्नारी गानलालसा १ विचित्रप्रतिमाला
ढ्यमपूर्वं दृष्टुमुद्यता अपूर्वगानलावण्यविवशा जगदंबिका ॥ २ ततः परं महादेवस्तद्दिदृक्षुर्विलोकयन् सः पुनर्गणानथ वीक्षयं
बयामास सत्वरं ते पि सर्वे महोत्साहाः नंदीशप्रमुखा गणाः ॥ प्रमुखाः शंकराज्ञाया स्वरूपं प्राकुर्युरादरात् ४ श्रीशंकर उवाच ॥
किं नृत्यं नंदिकेशान किं वा नृत्यं गणैरपि ॥ किमन्यैरपि मे नृत्यं स्वकार्यं करणोद्यतैः ५ सर्वकल्याणतेयं गौरी दर्शनवर्जितः उत्साह
वृद्धिहेतुश्च दृश्यते न तया विना ॥ लोके संति पदार्थास्तु बहवस्तोषहेतवः ॥ किं तैरनंतैरपि मे पदार्थैरर्थसाधितैः ७ रमणीयतरं व
स्तु गौरीरूपं मनोहरं तदन्यत्तादृशं लोके न जातं न भविष्यति ॥ ८ नारी सृष्टिरपूर्वापि विलासाय कदाचन ॥ क्रियते तादृशी सृष्टिः
तत्कल्पापि न जायते ९ कस्मिन्मुहूर्ते सा सृष्टा स मुहूर्तोपि दुर्लभः मुहूर्तमहिमा कोवा सा सृष्टिस्तावदद्भुता १० सृष्टो मुहू
र्त्तोपि मया समुहूर्तो विलक्षणः तन्मुहूर्तसमानस्तु मुहूर्तोपि न दृश्यते ११ न तत्कल्पोपि कल्पांतेक्षणमध्येपि दुर्लभः कल्यादि
रयमतस्मिन्समये दृश्यतेपि न ॥ इत्युक्ते तद्वचः श्रुत्वा नंदिकेशादयो गणाः परस्परं मुखं दृष्ट्वा विचारं चक्रुरादरात् १२ सत्समुक्तं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

महेशेननकार्यंतद्रूपक्षितं॥ विलक्षणमितंकार्यंकर्तुमेवनशक्यते॥१५॥ सुरादेवगणास्सर्वेतृणेनैकेनतंतुना॥ बिसवस्यानि
बद्धाश्चसामर्थ्यंतादृशंमम॥ लुलकांतःस्थिताःसर्वेसागराःसरितस्तथा॥ सरांसिचतथान्यच्चजलंमुक्ताफलाकृति॥१७॥ म
द्ब्रायनिपातनकंपर्यंतसुराअपि॥ ब्रह्मांडमंडलंसर्वमनुकल्पंहृतंमया॥१८॥ मद्दत्तस्यभृत्यभृत्योपिब्रह्मविष्ण्वादिदुर्जितं॥ तद
ष्ट्वापिसकंपास्तेकिमिहागतइत्यपि॥१९॥ तदागमनवेलायांकृतांजलिपुटास्तदा॥ दंडवत्प्रपाताएवभवंतिसदराःसुराः॥२०॥ सा
मर्थ्यमीदृशंसर्वंमहेशस्यैवयद्यपि॥ तथापितत्कृपालेशादभिमानोममेदृशः॥२१॥ शिवकिंकरभावेनममसामर्थ्यमीदृशं॥ तथापि
किंकरामात्रसामर्थ्यंकुंठितेमम॥२२॥ कुंठितेसतिसामर्थ्येकार्योल्लंघनजायते॥ अतस्तत्कार्यकरणंदुर्लभंचाधुनामम॥२३॥ को
नाप्रभुत्वंक्वास्माकंतत्कार्यकरणोद्यमः॥ महाप्रभुंमहादेवःकिंनजानासितद्वचं॥२४॥ ज्ञात्वापिसमहादेवःमहाप्रभुरितिस्वयं॥ रामः
अस्मानाज्ञापयत्येवमस्मद्भाग्यमिदंखलु॥ अहमादेशपितासिनतःप्रचलिताशिवा॥ खोकठयापरतंत्रनकेसंममसर्वथा॥ २२
अतिस्वातंत्र्यमीशानगौर्योस्तावद्धिनिश्चितं॥ नान्याज्ञावर्ततेगौरीसाक्षाच्छिवानुग्रहस्तथा॥२७॥ महेश्वरानुग्रहस्यकिमशक्यंज
गत्त्रये॥ तदनुग्रहपात्रत्वंदुर्लभंजगतीतले॥२८॥ शिवानुग्रहलब्धाच्चतत्पारायणाद्यः॥ तपस्याकरणाद्भक्ताःसर्वेपिगिरि
कंधरे॥२९॥ मध्येसमागताःकेचित्भवद्भिरधुनागणाः॥ समागतंनिमित्तेनभवदागमनेतव॥३०॥ नाद्यावलोकनाद्भक्तागिरिरा
जकुमारिका॥ भवदागमनंतावत्तयानज्ञायतेखलु॥३१॥ कृतन्त्वाद्यसमारंभःक्वगणागमनादरः॥ भवदागमनेनापिनकार्यं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भावि दृश्यते ॥ ३२ ॥ भवतां गणनाकुत्र मम वाक्यस्य साधुना ॥ कोटिशो वा समायांतु गणाः किं तैः प्रयोजनं ॥ न गणानां प्रवेशोस्ति
तन्नारीनाट्यमंटपे ॥ तद्द्वारदेशेपि गतिः अस्माकमतिदुर्लभाः ॥ पुनः पुनः समायांति तत्र नाट्यांगनाः किरु ॥ गतिर्गानानुमाने
नन्नूतनेनानुमीयते ॥ ३५ ॥ गणाश्च परंतु तज्ज्ञानं नानुभूतं पुरा मया ॥ नात्येविद्भ्रमरादेर्वा मे दृष्टेनापि वा ततः ॥ सृष्टास्ताः शंकरे
णैव गाननाट्यविशारदाः ॥ तिरस्कारः शारदायाः परैनाः कर्तुमुद्यताः ॥ कदाचिद्द्वकालात्कृतदन्यामरांगनाः ॥ तदंघगंधगंधो
पि किमत्र प्रसरिष्यति ॥ ३८ ॥ गाननाट्यविलोलाया पार्वत्याश्चलने यदि ॥ विलंबस्तावदाकाशादस्माकं विडंबना ॥ ३९ ॥ अयं
विलंबो देवस्य महादेवस्य सर्वथा ॥ अपेक्षितो भवत्येव सानुमीयत एव हि ॥ ४० ॥ अन्यथा नाट्यनारीणां प्रेषणेन पुनः पुनः पुनः
पुनः फलान्नादिपदार्थप्रेषणं कथं ॥ ४१ ॥ गंधः समागतः कोपि गंधः पूर्वविलक्षणः ॥ पक्वान्नानामनंतानामपूर्वाणां विशेषतः
पक्वान्नकरणायासो न शिवस्य कदापि च ॥ तदिच्छया परं सृष्टिः तेषां तु स्यादनुक्षणं ॥ ४३ ॥ प्रसन्नानि प्रेषितानि महादेवेन सार
रं ॥ विलक्षणानि तद्गंधः कथमत्रानुभूयते ॥ ४४ ॥ ब्रह्मांडमंडले व्याप्नोऽसयं गंधो विलक्षणः ॥ पुष्पवृष्टिर्गंधसृष्टिर्न शंकरेणात्र
तास्वलु ॥ नकल्पतरुपुष्पेषु सुगंधोपीदृशः खलु ॥ अस्य गंधस्य महिमा शिवेन ज्ञायते परं ॥ ४६ ॥ महेशसृष्टिचातुर्यमिदमत्रा
नुभूयते ॥ अतस्तेन विलंबाय सृष्टिरेव प्रकल्पिता ॥ ४७ ॥ सहस्रशः प्रपास्यंति न सकल्पास्तथाप्ययं ॥ नाट्योत्सवो न रंगात्स्याद
धुनापि न वायतः ॥ नाट्यनापि न वनायं नूतनापि न योत्सवः ॥ पुनः पुनर्भवत्येषनवनाट्यविलोकने ॥ नारीणां नाट्यसामान्यवि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

विलोकनरतिर्नवा॥ किंपुनर्नाट्यभेदानामवलोकनसंभ्रमः॥ अतः परं महेशेन नाट्यं नारीगणो यदि॥ नेक्ष्यते तत्प्रतापश्चेन्निर्विघ्न
गतिरंबिका॥५२॥ वांछैते पवनामंदाः प्रसूनासारसंवृताः॥ मरंदवृष्टिरधुना प्रवृत्ता दृष्टिगोचरा॥ चिरंजीवितु चातोयं असारासा
रसंगमः॥ गंधोपि नाट्यं गानं च किमस्माकमितो भयं॥ स्वयं विलंबसोढ्यापि विलंबस्यास्य कारणं॥ प्रेरयंत्यंबिकानाथ किमं
भापि करिष्यति॥५५॥ अत्रापि नवनाट्यस्य प्रसंगोत्पिनवेद्यदि॥ तदा भवित्वमेवस्याद्वयाशिवमंदिरं॥ किंचावगणनातावदेव
यान्नहृताधुना॥ नाट्यस्यास्य महेशेन प्रेषितस्यादरः कृतः॥ नाट्यानादरमात्रेण शंकरानादरो यदि॥ तदा कठिनमिसवहृतं
नाट्यावलोकने॥५८॥ अनादरस्य विषयोप्येतन्नाट्यं न सर्वथा॥ अपूर्वस्यास्य नाट्यस्य कथं वा स्यादनादरः॥ नाट्यकालाद्दरुस्या
पि प्रवर्षामंगलाप्यते॥ नाट्यावलोकनरसाववीनावियद्योपिसः॥६०॥ एतन्नाट्यविलोकनेश्रममहाबोधेमहाबाडवो यानंदाब्धि रामः
सुधाकरः शिवगणानां स्यः शिवाशास्यतां॥६१॥ प्राप्तः प्रापकरानदीर्घसुरतां नाधेरयं वर्णनां मागोतीत इति श्रमोपि न तथा तद्व 23
र्णनाभ्युद्यमे॥ सामर्थ्ये गिरिशः स्वकं मुनिगणावद्यं प्रकृष्टं परं तन्नाट्यैः प्रकटीकृतं पटुतरा सृष्टिक्रवाता दृशी॥ मायामात्रमिदं न
येन विपुला विद्याविलासा भवे सोयं शार्व विलासरंजनकृतः को वा विलासो भवेत्॥ आगंतावदिह दृशं सुरगणाश्चास्यैव लो
दुर्लभं श्रुतैस्तैरपि सर्वथा न विदितं दैवैर्मुनींद्रैरपि॥ गंधर्वैरपि किंनरैरपि तथा नागेन्द्रैरयं संतोषो न नु भूत इत्यनुदिनं नाट्यो
त्सवो मृग्यते॥६३॥ वार्त्तासियमुमा सहायनिकटस्यास्य स्वयं सर्वथा नाट्यानंदसुधार्णवः प्रतिपदं वृद्धिं प्रयास्यत्ययं॥ विघ्नायागमने

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गिरींद्रतनया संगे धुनाडुल्लेश्वो विघ्नध्वांतनिवारकोपि जगती दृष्टेन दृष्टः पुनः ॥ ६० ॥ विघ्नेशोपि न शक्तस्त्व सहसा नाद्य सर्वधं
सनेतत्वाद्यस्य विनाशनाय सकथंप त्वं करिष्यसपि ॥ नाद्यो साह्यविघातकः तदितरः कोवा जगन्मंडले शुंडादंड विराजितः ख
लुमहाढुंढिः सनाश्रयतः ॥ ६१ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयोध्यायो व्यासमुनिसंवादोनाम ३ ॥
॥ श्रीव्यासः ॥ शिवानामिनेनं दृष्ट्वा शंकरो लोकशंकरः ॥ तद्धि लुबस्यांकं बीजे प्रायः श्रांता पतिप्रिया ॥ १ ॥ आयः सुरकरघातः
पथि वृत्तान्यथा कथं ॥ स्वनागमनेनेमतस्याकोमलावयवा शिवा ॥ ० ॥ शिरीषप्रसवस्यापि मार्दवं तादृशं नहि ॥ यादृशं गिरिजादेहसुगं
धपरिवेष्टिते ॥ २ ॥ गिरिजादेहसंबंधमार्दवस्य वयोनकिं ॥ शिरीषकुसुमप्राप ब्रह्मारण्य तरू परं ॥ ४ ॥ क्वा शिरीषकुसुमं क्व शिवादे
हमार्दवं ॥ कियदंतरमेतस्य तस्यापि मृदुलान्मये ॥ ५ ॥ कैलासदुर्गमार्गस्य भास्करस्वकरैः परं ॥ चकार खलु दुर्गं तं दुर्गे त्वं च गिरेरपि ॥
६ ॥ तन्मार्गे विरजा कांतिः प्रवत्ताप्राय शस्तथा ॥ श्रांतास गिरिजातीताल तांतनलुकोमला ॥ ७ ॥ सुधाकरकरा गीवा मृदुलत्वं नता
दृशौ ततसा श्रांतिमापन्ना मार्गो दूरतरो थ्यथयं ॥ ८ ॥ अमंदवातसंगोवा तद्धिमानेन भूरिशः ॥ तदाघातेनवा श्रांता सापरं सर्वमंगला ॥
मद्वाचामरवातानाममंदानां प्रसादतः ॥ श्रांता तावच्च विश्रांता किं तद्विश्रामसाधनं ॥ नतदाप्तजनस्तत्र श्रमापहस्त्वाश्रमः ॥ विनाते
नकथं मार्गे सिमामास्पति शांभवी ॥ मेनकाकिं परित्यक्ता तया कैलासमंदिरात् ॥ साचेत्सहस्रमायाति तदा खलु न संभ्रमः ॥ तया
विनानापहारे गौर्यकोवा समर्पयेत् ॥ उपाहरा दरागौरी सानुचारमितिश्रुतं ॥ सोसुन्नाकिं यदि श्रांता स्वभावेनालसापरं ॥ चिंतयावा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

परिश्रांता किं तया चिंतया फलं ॥ १७ श्रांतायाः पथि विश्रामो जलनेऽलनकान्वये ॥ पतिसंगेन वानलंसलेन नविनाभवेत् ॥ चिरंसं
भ्रमसंक्रांता मेनयासहसंगमे ॥ तद्वियोगेनसाश्रांता कोमलं तन्मनोपिहि ॥ मयापितावन्नगतं यत्रसागिरिकन्यका ॥ तत्राभ्या
ससहायेनसुखागमनमिष्यति ॥ १७ मध्येपथागिरिसुतातथापिकठिनानसा ॥ दृष्टापिबहुधाकालेगिरिजाकोमलालता ॥ त
त्राभ्याससहायेनसुखागमनमिष्यति ॥ तपस्ययातनुर्हन भवान्याः पूर्वमेवसा ॥ तांतानितानमधुना श्रांतापथिविशेषतः ॥ १९ त
पसा दूनदेहायाः गौर्यास्तुविजृंभणं ॥ अद्यापिनाभवत्येवश्रांतापथिविशेषतः ॥ २० तयाद्युयंततः पूर्वंतेनतावत्कृतंखलु ॥ तस्याल
नुस्तनुस्तावत्तनुतामगमत्पुनः ॥ २१ अतः परंमयातावत्तत्रगंतुं नशक्यते ॥ वक्तुमप्यधुनाशक्तिस्तदनागमनानने ॥ २२ न तदास
मुखाद्वार्त्ता कापित्र श्रूयतेमया ॥ कस्यायागमनंमात्रयता दूरतरंस्थलं ॥ २३ आवासोप्युचितोनात्रवार्तानागमनादिह ॥ यत्रवार्त्ता रामः
प्रसारस्यात्तत्रावस्थानमीप्सितं ॥ प्रतिक्षणंप्रियावार्त्ता प्रियेण श्रूयते यदि ॥ तदाप्रियाप्रीतचित्ता विश्रांतिमुपयास्यति ॥ अवैरा २४
ग्याद्भूयं सर्वो विचारः क्रियतेधुना ॥ भार्याचर्याविचारोपि विरक्तस्यकथं भवेत् ॥ २५ अवैराग्ये परमेभाग्ये तत्सार्ग्यमतिदुर्लभं ॥ ज्ञान
एवविचारोयं क्रियतेपिप्रतिक्षणं ॥ सपार्धंवायदिकृतं तेननप्रलयेस्वयं ॥ ऋतुकालाभिगमनं ब्रह्मचर्यमितिश्रुतं ॥ तदभावेप
सवेति तेननैवतपःक्षयः ॥ प्रत्युत श्रूयमाणा प्रजातंतुमितिश्रुतिः ॥ भार्यासंगपरित्यागकृताकिंनभविष्यति ॥ २६ विशेषतः
तपः प्राप्तंभर्तृत्वंतस्यपालनं ॥ भार्यापालनमात्रेणातन्नतेनविनाभवेत् ॥ गौरीविशालनयनेश्च मपाक्रमणोत्सवः ॥ मन्मुखो
३ किंनापरिग्रहः पूर्वंनकर्तोः सकर्तो यदि ॥ न सालनपरित्यागो प्रत्यवायोपि जायते ॥ न साध्वी शुनत्री साज्या नम्मनोरुद्ध पांक्षम ॥

भोजमासाद्य सद्यः संप्रतिवर्द्धितां ॥ मयापि तावदधुनात्रागमनहेतवः ॥ नदृश्यंते तत्र हि लेबे किं । बीजमिति चिंतिते ॥ इतिसंचिंत्य
सस्मार कुमारं गणनायकं ॥ ततः परं स विघ्नेशः सत्वरं हृष्टमानसः ॥ संतोषकारणं किं वा विलक्षणमिहाधुना ॥ आनंदो वर्धते
सोयं सुधानिधिपराक्रमः ॥ प्रायः स्मरहरः किं मां सस्मार स्मरपूर्वकं ॥ अन्यथा कथमेतावानानंदाब्धिः प्रवर्द्धते ॥ ३८ ॥ चिन्हान्यपि
मनोज्ञानि दृश्यंते शिवदर्शने ॥ सांबदर्शनमस्पाद्य भविष्यति न संशयः ॥ ३९ ॥ पुण्यानां परिपाकोयं अधुना समुपस्थितः ॥ यत्ता
दृपद्मं भक्त्याद्य दृष्ट्वा प्रीतो भवाम्यहं ॥ ४० ॥ वेदांतैरपि तत्त्वानवलहुं [illegible] नाशकं ॥ इच्छेहमधुना रम्यं रमणीयवरोत्तमं ॥ ४१ ॥ रमणी
यानि दृष्टानि वस्तूनि विविधान्यपि ॥ न तत्तुल्यं क्वापि दृष्टं दुर [illegible] वनाशकं ॥ ४२ ॥ वांछंति यत्पदांभोजं द्रष्टुं नारायणादयः ॥ तैर्न दृष्टं
नकेनापि द्रष्टव्यमपि तत्परं ॥ तपसा नाति घोरेण धर्मैर्वा विविधैः ॥ ४३ ॥ परंतु तत्त्व सद्यः शंकरानुग्रहान्मम ॥ इत्युक्त्वा स त्वरं सांबस्म
त्वा शंकरपादुके ॥ ध्यात्वा यये गणाधीशः शिवसंनिधिमादरात् ॥ ततः प्रणम्य बद्ध्वा कृतांजलिपुटः प्रभुः ॥ शंभुं स्तोतुं मतिं चक्रे स
र्वाभीष्टप्रदायकं ॥ नमस्ते देवदेवाय नमस्ते रुद्रमन्यवे ॥ नमस्ते चंद्रचूडायाच्युतात इषवे नमः ॥ नमस्ते पार्वतीकांतमेकरूपाय धन्व
ने ॥ नमस्ते भगवन् शंभो बाहुभ्यामुत ते नमः ॥ ४८ ॥ इषुः शिवतमा या ते तया मृडय रुद्र मां ॥ शिवं धनुर्यद्भवत्तेनापि मृडयाधुना ॥
॥ ४९ ॥ शरव्या या शिवतमा तयापि मृडय प्रभो ॥ या ते रुद्र शिवा नित्यं सर्वमंगलसाधनं ॥ ५० ॥ तयाभिचाकशीहि त्वं तनुवा मामुमाप
ते ॥ अघोरयापि तनुवा रुद्राघापापकाशिनी ॥ या तया मृडय स्वामिन् सदा शंतमया प्रभो ॥ गिरिशंत महारुद्र हस्ते या मिषुमस्तवे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बिभर्षि तां गिरित्राद्य शिवां कुरु शिवापते ॥ शिवेन वचसा रुद्र निशे त्वाछावदामसि ॥ ५३ ॥ त्वत्कृते परिपतांगमा हिंसीः पुरुषं ज
गत् ॥ यत्नः शर्व जगत्सर्वमयक्ष्मं सुमना असत् ॥ ५४ ॥ यथा तथा च मां रुद्र त्वं कुरुष्व दयितप्रभो ॥ रुद्र त्वं प्रथमो दैव्यो भिषक्पापवि
नाशकः ॥ अध्यवक्ताध्यवोचन्मां भावलिंगार्चकं मुदा ॥ अहींश्च सर्वान्यातुधान्यः सर्वा अप्यद्य जंभयन् ॥ असौ ताम्रारुणो बभ्रुर्नी
लग्रीवः सुमंगलः ॥ विलोहितोऽस्य यः शंभो त्वद्दृष्टिस्थानमेव हि ॥ नमो नमस्ते भगवन्नीलग्रीवाय मीढुषे ॥ सहस्राक्षाय शुद्धाय स
च्चिदानंदमूर्तये ॥ उभयोरार्त्न्योर्या ज्याधन्वनस्तां प्रमुंचतात् ॥ संधाय धनुरन्येषां भयाय प्रविष्यसि ॥ अस्मद्दयते न शार्व
अधुनाऽपराः प्रभो याश्च ते हस्त इषवः परा ता भगवो वप ॥ ६० ॥ अवतत्य धनुस्त्वं सहस्राक्ष शतेषुधे ॥ मुखा निशीर्य शल्या
नां शिवो नः सुमना भव ॥ ६१ ॥ विज्यं धनुरिदं भूयाद्विज्यो बाणवानपि ॥ अनेशन्निषवोऽप्यस्याभ्यामुरस्क निषंगधिः ॥ कपर्दिनो रामः
महेशस्य यदि नाम्नु निषंगधिः ॥ इषवोऽपि समर्थाश्चेत् साग्रत्वेन भयं भवेत् ॥ या ते हेतिर्धनुर्हस्ते मीढुष्टम बभूव या ॥ तयास्मान् २५
विश्वतस्त्वं न पालय त्वमयक्ष्मया ॥ अनातताया सुधायनमस्ते धृष्णवे नमः ॥ बाहुभ्यां धन्वने शंभो नमो भूयान्नमो नमः ॥ परितो
धन्वनो हेतिः विश्वतोऽस्मान्वृणक्तु सः ॥ इषुधिस्तव यश्चाव दस्मदारे निधेहि तं ॥ हिरण्यबाहवे तुभ्यं सेनान्ये ते नमो नमः ॥ दिशां च
पतये तुभ्यं पशूनां पतये नमः ॥ त्विषीमते नमस्तुभ्यं नमस्ते सस्पिंजराय ते ॥ नमः पथीनां पतये बभ्लुशाय नमो नमः ॥ नमो विव्याधिने
न्नानां पतये प्रभवे नमः ॥ नमस्ते हरिकेशाय रुद्रायोपवीतिने ॥ ६२ ॥ पुष्टानां पतये तुभ्यं जगतां पतये नमः ॥ संसारहेतिरूपाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुद्रायाप्याततायिने ॥ ७० ॥ क्षेत्राणां पतये तुभ्यं सूताय सुमहात्मने ॥ सहंत्याय नमस्तुभ्यं वनानां पतये नमः ॥ रोहिताय स्थ
पतये मंत्रिणे वाणिजाय च ॥ कक्षाणां पतये तुभ्यं नमस्तुभ्यं भुवंतये ॥ तद्वारिवस्कृताया स्तु महादेवाय ते नमः ॥ ओषधीनां
च पतये नमस्तुभ्यं महात्मने ॥ उच्चैर्घोषाय धीराय धीराक्रंदयते नमः ॥ पत्तीनां पतये तुभ्यं कृत्स्नवीताय ते नमः ॥ धावते धवला
य धिसत्वनां पतये नमः ॥ नमस्ते सहमानाय तुभ्यं निव्याधिने नमः ॥ अव्याधिनीनां पतये ककुभाय निषंगिणे ॥ स्तेनानां पतये तु
भ्यं दिव्यइषुधिमते नमः ॥ तस्कराणां च पतये वंचते परिवंचते ॥ स्तायूनां पतये तुभ्यं नमस्तेस्तु निचेरवे ॥ नमः परिचरायापि महारुद्रा
य ते नमः ॥ अरण्यानां च पतये मुष्णतां पतये नमः ॥ उष्णीषिणे नमस्तुभ्यं नमो गिरिचराय ते ॥ कुलुंचानां च पतये नमस्तेस्तु भवाय
च नमो रुद्राय शर्वाय तुभ्यं पशुपते नमः ॥ नम उग्राय भीमाय नमो अग्रेवधाय च ॥ नमो दूरेवधायापि नमो हंत्रे नमो नमः ॥ हनीय
ते नमस्तुभ्यं नीलग्रीवाय ते नमः ॥ नमस्ते शितिकंठाय नमस्तेस्तु कपर्दिने ॥ नमस्ते व्युप्तकेशाय सहस्राक्षाय मीढुषे ॥ ८२ ॥ गिरिशा
य नमस्तेस्तु शिपिविष्टाय ते नमः ॥ नमस्ते शंभवे तुभ्यं मयोभव नमोस्तु ते ॥ मयस्कर नमस्तुभ्यं शंकराय नमो नमः ॥ नमः शिवाय शा
वाय नमः शिवतराय च ॥ ८४ ॥ नमस्तीर्थ्याय कुल्याय नमः पार्याय ते नमः ॥ आवार्याय नमस्तेस्तु नमः प्रतरणाय च ॥ नम उत्तरणाया
आतार्याय ते नमः ॥ आलाद्याय नमस्तेस्तु भक्तानां वरदाय च ॥ ८६ ॥ नमः शष्प्याय फेन्याय सिकत्याय नमो नमः ॥ प्रवाह्याय नमस्ते
स्तु ह्रस्वाय नमो नमः ॥ वामनाय नमस्तेस्तु नमोस्तु बृहते नमः ॥ वर्षीयसे नमस्तेस्तु नमो वृद्धाय ते नमः ॥ संवृध्वने नमस्तुभ्यं अग्रिया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यनमो नमः ॥ प्रथमाय नमस्तेस्तु भं आशवे चाजिराय च ॥ शीघ्रियाय नमस्तेस्तु भं शीभ्याय च नमो नमः ॥ नमस्तूर्म्याय चावस्व
न्याय ते नमः ॥ स्रोतस्याय नमस्तेस्तु भं द्वीप्याय च नमो नमः ॥ ज्येष्ठाय च नमस्तेस्तु भं कनिष्ठाय च ते नमः ॥ पूर्वजाय नमस्तेस्तु भं नमो ऽपर
रजाय च ॥ मध्यमाय नमस्तेस्तु भं ह्रीप्याय च नमो नमः अपगल्भाय ते नमः ॥ जघन्याय नमस्तेस्तु भं बुध्नियाय नमो नमः ॥ सोभ्याय
प्रतिसर्याय याम्याय च नमो नमः ॥ क्षेम्याय च नमस्तेस्तु भं याम्याय च नमो नमः ॥ उर्वर्याय नमस्तेस्तु भं खल्याय च नमो नमः ॥ ९४ ॥
श्लोक्याय चावसान्याय चावस्वन्याय च ते नमः ॥ नमो वन्याय कक्ष्याय मौञ्जाय च नमो नमः ॥ श्रवाय च नमस्तेस्तु भं प्रतिश्रवन नमो नमः ॥
आशुषेणाय शूराय नमस्तेस्त्वाशुरथाय च ॥ ९६ ॥ वरूथिने वर्मिणे च बिल्मिने च नमो नमः ॥ श्रुताय श्रुतसेनाय नमः कवचिने नमः ॥ दुं
दुभ्याय नमस्तेस्तु भं स्वायुधाय नमो नमः ॥ प्रहिताय नमस्तेस्तु भं धृष्णवे प्रहिताय च ॥ ९८ ॥ पाराय पारविदाय नमस्तीक्ष्णेषवे नमः ॥ राम:
सुधन्विने नमस्तेस्तु भं मोहन्याय च ते नमः ॥ नमः स्रुत्याय पथ्याय नमः काट्याय ते नमः ॥ नमो नीप्याय सूद्याय सरस्याय च ते नमः ॥ १०० ॥ २६
नमो नाद्याय भव्याय वैशन्ताय नमो नमः ॥ अवट्याय नमस्तुभ्यं नमः कूप्याय ते नमः ॥ १ ॥ अवर्ष्याय च वर्ष्याय मेघ्याय च नमो नमः ॥ विद्यु
त्याय नमस्तेस्तु भं मीध्रियाय नमो नमः ॥ २ ॥ आतप्याय नमस्तेस्तु भं वात्याय च नमो नमः ॥ रेष्म्याय च नमस्तेस्तु भं वास्तव्याय च ते नमः ॥ वास्तु
पाय नमस्तेस्तु नमः सोमाय ते नमः ॥ नमो रुद्राय ताम्राय चारुणाय च ते नमः ॥ नमः उग्राय भीमाय नमः शंभांगाय ते नमः ॥ नमस्ती
र्थ्याय कुल्याय सिकत्याय नमो नमः ॥ ५ ॥ प्रवाह्याय नमस्तेस्तु भं इरिण्याय च ते नमः ॥ नमस्ते चं इरचूलाय प्रपथ्याय नमो नमः ॥ ६ ॥ किंशि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लायनमस्तस्तु क्षयपापायचते नमः ॥ कपर्दिने नमस्तस्तु नमस्तेस्तु पुलस्त्यये ॥ नमो गोध्यापस्तृद्धायग्रहावांपतये नमः ॥ नमस्ते
स्थाययेगेह्याय गुहावासायते नमः ॥ काष्ठ्यायगेह्यागेष्ठाय हृद्य्याय चते नमः ॥ निवेष्व्याय नमस्तुभ्यं पांसव्याय चते नमः ॥ रजस्या
यनमस्तुभ्यं परात्परतराय च ॥ नमस्ते हरिकेशाय शुष्क्याय च नमो नमः ॥ १० हरित्याय नमस्तुभ्यं ह्रीं हृद्याय ते नमः ॥ नमस्तुर्याय
सर्प्याय पर्ण्याय च नमो नमः ॥ नमोपगुरमाणाय पर्णशद्याय ते नमः ॥ अविघ्नते चाखिदते नमः प्रखिदते नमः ॥ विश्वरूपाय वि
श्वाय विश्वाधाराय ते नमः ॥ त्र्यंबकाय रुद्राय गिरिजापतये नमः ॥ मणिकोटिरकोटिस्थकांतिदीप्ताय ते नमः ॥ वेदवेदांतवेद्याय वृषा
रूढाय ते नमः ॥ अविज्ञेयस्वरूपाय सुंदराय नमो नमः ॥ उमाकांत नमस्तेस्तु नमस्ते सर्वसाक्षिणे ॥ हिरण्यबाहवे तुभ्यं हिरण्याभर
णाय च ॥ नमो हिरण्यरूपाय रूपातीताय ते नमः ॥ हिरण्यपतये तुभ्यं अंबिकापतये नमः ॥ नमउमापतये तुभ्यं नमः पापप्रणाशक ॥
मीढुष्टमाय दुर्गाय कद्रुद्राय प्रचेतसे ॥ तव्यसे बिल्वपत्राय नमः कल्यापरूपिणे ॥ १८ अपारकल्याणगुणार्णवाय श्रीनीलकंठा
य निरंजनाय ॥ कालांतकाय पिनमो नमस्ते दिक्कालरूपाय नमो नमस्ते ॥ वेदांतवेदस्तु तस्सकृत्पायगुप्तप्रवीणाय गुणाश्रयाय ॥
श्रीविश्वनाथाय नमो नमस्ते काशीनिवासाय नमो नमस्ते ॥ २० अजातसौंदर्यसुधानिधानसमृद्धिरूपाय शिवाय धवाय ॥ धारा
धराकार नमो नमस्ते धारास्वरूपाय नमो नमस्ते ॥ नीहारताराकरकाकराकरप्रकार हाराप्रतिहारवीर ॥ वीरेश्वरापारदयानिधा
नपाहि प्रभो पाहि नमो नमस्ते ॥ २२ एवं स्तुत्वा महादेवं प्रणिपत्य पुनः पुनः ॥ कृतांजलिपुटस्तस्थौ पार्श्वे ढुंढिविनायकः ॥ तमालो

वयसुतंप्राप्तं वेदवेदांतपारगं ॥ स्नेहाश्रुधारासंवीतंप्राह दुंढिं सदाशिवः ॥ १२४ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे व्याससुनिसंवादे नाम दशमोऽध्यायः ॥ १० ॥ व्यास उवाच ॥ एवमुक्त्वा महादेवं प्रणिपत्य पुनः पुनः ॥ कृतांजलिपुटस्तस्थौ पार्श्वे दुंढिविनायकः ॥ तमालोक्य सुतं प्राज्ञं वेदवेदांतपारगं ॥ स्नेहाश्रुधारासंवीतं प्राह दुंढिं सदाशिवः ॥ २ ॥ सदाशिव उवाच ॥ कुशलं खलु ते दुंढे कुमारः कुत्र वर्तते ॥ दृष्टोसि बहुकालेन तस्यापि कुशलं खलु ॥ त्वया सह कुमारस्याम्बया गिरिजया सह ॥ एकत्रवासः सततं कर्तव्यस्य ततः परं ॥ न कुमारवियोगोस्य वियोगस्तव वा मम ॥ तथा गौरीवियोगो वा सर्वथा नैव रोचते ॥ गौरीं विहाय भवता भवतापापहारिणी ॥ नस्थातव्यं कुमारेण मयापीति विचारय ॥ अधुना निर्गता गौरी सुंदराद्रिशिरं दिवात् ॥ मंदं मंदं समायाति सा मंदगमना खलु ॥ कैलासमंदिरं दूरं वरं सुंदरसुंदरं ॥ तत्र तिष्ठति यद्वा साम ध्यायति शंभवी ॥ कस्तदागमने विघ्नः परिहार्यस्त्वया सुतः ॥ जननी दर्शनोत्कंठा तव किं वा न जायते ॥ इत्युक्ते तद्वचः श्रुत्वा प्रणिपत्य पुनः पुनः ॥ जगाद वचनं चारु सर्वेशार्थविजृंभितं ॥ १० ॥ गणेश्वर उवाच ॥ स्वामिन्नायाति सा गौरी दूरमेतद्धि मंदिरं ॥ दूरागमनवेलायां किं विलंबो न जायते ॥ किंच सा पथि विश्रम्य मंदमायाति शांभवी ॥ मंदं मंदं मंदवातवालिवीतापि तेन सा ॥ न तदाध्येन भुक्तास्ति मार्गायासस्तया शिव ॥ गौरीशरीरं लोकेस्मिन् कोमलादपि कोमलं ॥ किंच नाट्यसमारंभसाधनानि त्वया खलु ॥ प्रेषितानि विविधानि प्रायस्तल्लासोल्लसिना ॥ गाननाट्यसमारंभो यः पर्वेः कल्पितस्त्वया ॥ तद्दलोकनसंतुष्टा कथमायातु सत्वरं ॥ तदालोकनविघ्नोपि मया कार्योऽधुनाप्यसौ ॥

राम: २७

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सविघ्नस्तावेद्वस्था भवेत्सेवापकारकः॥ अंबापश्यतिनाद्यापि चेतत्त्वांद्यावलोकने॥ मयानुकूलाचरणं कर्त्तुमितिमन्वहे॥१७॥
अंबामहो सेवाविघ्नं किं कर्त्तुं यतते मनः॥ कृतेपि यत्ने तद्विघ्ने यत्ने विघ्नो भविष्यति॥ अन्येष्टविघ्नाचरणे सामर्थ्यं मम यद्यपि॥ तद्वि
घ्नाचरणयत्नः कृतोपि विफलो भवेत्॥ फलानुकूलविचारणायः कार्यकरणोद्यतः॥ तेन कार्यं भवेत्सेवनान्येनेत्यवधारितं॥२०॥ तथापि
यदि संजाता तदभ्यागमनत्वरा॥ तदाकथमितः सर्वमपर्वं प्रेषितं त्वया॥ ब्रह्मांडमध्ये यत्तुल्यं वस्तु क्वापि न दृश्यते॥ तादृशं सृष्ट
मद्येश त्वयाविभ्रान्तमनारवलु॥ अदृष्टपूर्वं दृष्ट्वापि कस्य वा विरतं मनः॥ दृष्टपूर्वेष्वपि मयेपि न रम्ये विरतं मनः॥२३॥ तद्विघ्नाचरणे गौ
रीकुपिता यदि पश्यति॥ तदा ममात्रागमने पुनः शंकितमेव नः॥ ब्रह्मांडमंडले कोवा तद्विघ्नाय प्रवर्त्तते॥ जीवनाशापरित्यागकृद
विद्युततेनया॥ भवत्सदंभोजविलोकनाय पुनः पुनश्चित्तमिदं प्रवृत्तं॥ नान्यत्र गंतुं यतते महेश त्वमेव माता च पिता त्वमेव॥२५॥ त्व
त्पादपद्मभ्रमरत्वमेतन्मनोभिवांछत्यतिलालसत्वं॥ किमुत्तमं वस्तु विहाय याति पवित्रवृत्तिः सुखवृत्तिकामः॥२६॥ यन्नभु
तं वेदवचः प्रपंचविचारविस्तारपरैरपार॥ तदद्य दृष्ट्वापि विहाय याति चित्तं रुष्टोऽरुद्धमिदं कथं वा॥२७॥ अतः परं ते मयि तत्कृपा चे
न्नयामि कालं खलु कालकाल॥ त्वत्सादुकाराधनसेवनाभ्यामन्यत्र तावन्नरुचिर्ममाद्य॥२८॥ अंबा समायास्यति चेदिदानीं त्व
त्पादपद्मार्चनविघ्न एव॥ नूनं तदभ्यागमनं तदानीं जविघ्नितं त्वत्पदपूजनेन॥२९॥ योषाजारमिव प्रियं प्रियतमं त्वत्सारूप्यं ममाप्य
लिंग्याद्य मम प्रपातिन कथं स्वाभीष्टसिद्धिं विना॥ सत्कुं वांछति जारमध्यतिघनं तद्भूनानामप्रभामं चित्तभ्रमरा जहाति न भवत्पादांबुजं शं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

करः ॥ ३० ॥ अनंतजन्मसंचितैरमितपुण्यपूर्वार्जितैरिदं शिवपदांबुजं नचनगोचरंजायते ॥ जगज्जनकशंकरत्रिदशनायकाचसभो
भवसदसैरारुहभ्रमरएवचित्तंमम ॥ भवंतुबहवःसुरास्त्रिपुरसूदनाराधकाः परंतुनसुरैरिदंतवपदांबुजंदृश्यते ॥ अपारगुणसा
गरप्रमथवीरगौरीपतेचिरंममममनःपदेतवविहारमन्विच्छति ॥ ३२ ॥ अलंविमलयोगिहृत्कमलमध्यसंसेरणं शिवांघ्रिकमलंधुनाशार
वाद्याचगव्याहृतात् ॥ वसस्वममममानसेकुगतिभारभारालसे विचारगिरिगह्वरप्रकरभूतभस्माद्वसे ॥ ३३ ॥ अनाथशरणागतासुरसु
रेकरक्षामणेत्रियंबकसदाशिवत्रिपुरदैन्यनाशाहर ॥ कृपामृतरससागरस्मरहरांधकारिहरप्रसीदभगवन्प्रभो भवभवाब्धिसं
शोषक ॥ यदित्रिनयनाधुनातवपदांबुजंत्यज्यतेमयाप्यममानसंममह्यसंमर्द्दितं ॥ सत्वानरतभवत्र विगतजीवनंतन्महं
नजीवनविवर्जितंक्वचनजीवजातंप्रभो ॥ शिवेकशरणस्यमेशरणमन्यदस्तीतिकिं भ्रमोपिभवतिप्रभो शिवपदांबुजाराधनं ॥ नि राम:
धानमितिमेमतिः तदितरेनिधानंनमेतदस्तिलघिनेपिनधनमनन्यलभ्यंधनं ॥ महेश्वरकृपिवाननजिह्वास्यमास्यांतरेस्थितान्नम २८
तिनिर्मलंशिवनिवर्दितंसाहरं ॥ अमृतसितशर्करामधुरमेवमीशाधुनाभवसदसरोरुहंनमममानसंस्पृशति ॥ सपार्धमपि
वामनःस्मरहरांघ्रिपंकेरुहंप्रभूतमकरंदपप्रमुदधारयाधीरया ॥ सुधामपिविहायनोविहरसादरंक्वासरस्तवापिममवामनःशर
पामिंदुमौलिंव्रज ॥ ३८ ॥ व्रजव्रजनिरंतरंव्रजमहेशपादांबुजंभजाभयदमव्ययंभजभजाधुनावाभज ॥ कथंनभजनेरतिःशिवप
दांबुजास्वान्यथाज्वलज्ज्वलनतेजसाज्वलतुतत्स्वरूपंमुहुः ॥ निधानमिदमेवमेसुहृतसिंधुसंघार्जितं ममाद्यनिधेयानवत्रिपु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रवेरिपादांबुजं ॥ इदं खलु सुदुर्लभं ननिधयस्तथा दुर्लभाः किमन्यदपि वांछितं ममनिशं वा ग्रिपद्मं विना ॥ ४० ॥ प्रयाति मरणे धनं न
धियः प्रयांत्येव किं प्रयांति पश्चावः प्रियाः प्रियतमाः प्रयांत्येव ताः ॥ न हन्यदपि याति तद्धितसुपुत्रमित्रादिकं न याति सुकृतं परेपशु
पतिप्रसादार्जितं ॥ ४१ ॥ न सांति शायमीदृशोपशुपतिप्रसादं विदुः स्मरारिचरणार्चनादधिकमस्ति किं वा फलं ॥ श्रुतिश्रुतमनेकधा
शिवपदांबुजाराधनं प्रधानधनमित्यपि प्रथितमेव वेदे ष्वपि ॥ ४२ ॥ निरंतरमुमापतिस्मरणकारणं दुर्लभं तपःफलमिदं मतं शि
नु वपदांबुजाग्रहात् ॥ किमन्यदधिकं फलं शिवशायामिपादांबुजे किमस्ति भुवनत्रयेप्यधिकमेतदन्यत्तव ॥ यदंघ्रिकमलस्वनेजग
ति दुर्लभं देहिनां सुरासुरमुनीश्वरप्रवरवांछितं तत्परं ॥ तदेव पुनराशितं मम पुनस्तदेवेप्सितं तदेव पुनरीप्सितं मम पुनस्तदेवे
प्सितं ॥ इदं शिवपदांबुजं यदि विहाय मोहात् सुदुः प्रयाति मदनांतकस्मरवहीनमेतन्मनः प्रयात्वयतु नेतनमे ॥ ४४ ॥ गिरिशानुस्मम
त्स्विप्रभो न चाहितमभीप्सितं भवतियाति संग्राह्यतां ॥ ४५ ॥ परात्परतरामरप्रवरशंकराधीरतां हरादरवशान्ममत्वमसि मे गतिः
सर्वथा अनन्यशरणं कथं हरविहातुमिच्छातवप्रचोदयधियः प्रियाः सत्यभर्गनस्तेपदे ॥ ४६ ॥ इति श्रीस्कांदे महापुराणे हि
मवत्खंडे शिवरहस्ये तृतीयांशे व्यासमुनिसंवादो नामएकादशोध्यायः ॥ ११ ॥ व्यास उवाच इत्याकर्ण्य वचस्तस्य करुणा
रसवारिधिः आलिंग्य दुंढिराजानमाह विघ्नहरं हरः ॥ १ ॥ स्तवनानेन सुप्रीतस्तवादेयं किमस्ति मे त्वं कुमारश्च गौरी त्वं प्रियेभ्य
न्यंत्रमे प्रियं ॥ २ ॥ अयं स्तवश्रुतिमतः श्रुत्यर्थः प्रकटीकृतः स्तवनानेन सुप्रीतो वत्स जीव चिरं चिरं ॥ ३ ॥ स्तुतास्तोत्रेण मां नत्वा प्राप्नु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यदीप्सितंफलं॥ स्त्वंराजत्वमापन्नःस्तवःसोयंममप्रियः॥ अतःपरंत्वयातावद्गिरिजासन्निधिंप्रति॥ गंतव्यंत्वरयातत्रत्वदीयंप
श्यसंभ्रमं॥ नाद्यागतालोकेननसंतुष्टागिरिकन्यका॥ यद्व्यामार्गपरिश्रांतातद्विचारस्तोचितः॥ जननीजनकश्चेतिपुत्रयो
र्ष्यद्वयंपरं॥ तत्रापिजननीश्रेष्ठागर्भधारणपोषयोः॥ विरक्तेनापिजननीपोषणीयाप्रयत्नतः॥ असाध्वीवास्तुसाध्वीवासाध्वी
तुसुतरामपि॥ असाध्वीयदिभर्त्तारंविहायान्यत्रतिष्ठति॥ तदुपेक्षानकर्त्तव्यापोष्यासान्नादिदानतः॥ यदिसाध्वीपितुर्गेहेबंधुगेहेपि
वावसेत्॥ तामाहूयस्वसदनेपुत्रःसंपोषयेतिच॥१०॥ त्वयापितत्रगंत्रापितदुद्वेगकरंपरं॥ कृत्यंनकार्यंसहसाकार्यंतदनुमोदनं॥
यदिश्रांतागिरिसुतामार्गायासेनसातदा॥ सुधादानादिनासम्यक्सेवनीयात्वयाशिवा॥ इतोन्यत्सुधांदिव्यांनिर्मितांमधुनाम
या॥ पीत्वावसिष्ठासापीतानिर्मितापिसुधामया॥ सुधाविशेषास्सास्यैवंहस्तेस्वंसुसादरा॥ नभवानीभवस्यैवसादरासाभविष्य राम:
ति॥ मद्भक्तशेषंदृष्ट्वापिप्रहृष्टागिरिकन्यका॥ स्वापितामद्यमीशोनलंशोभायामितिसादरा॥ पतिव्रतागिरिसुतासाततःपतिदेव २१
ता॥ तस्याःप्रीतिर्मयिप्रीतिर्ममतस्यांविशेषतः॥ साध्वीसपुत्रासुभगालावण्यनिधिरंबिका॥ ततस्तस्यांमयिप्रीतिधारारूपेणाव
र्तते॥ सालावण्यसुधांभोधिःसौभाग्यांबुधिरेवसा॥ सौभाग्यानांनिधानंसासागौरीसर्वमंगला॥ तद्वियोगेमंगलानिदुर्लभा
निमनीषिणां॥ तांसर्वमंगलांस्मृत्वादुष्कराण्यपिवस्तुतः॥ कार्याणिकृत्वासुज्ञःप्रियतत्कार्यफलमश्नुते॥ त्वयापिगमनेगौरीवर
पांबुरुहंमुहुः॥ स्मर्तव्यमतियत्नेनसर्वसिद्धिकरंपरं॥ पुरातारकसंहारंकुमारंकर्तुमुद्यतः॥ तमवष्टंभविहितार्थचिंतयामासचे
नसर्वमंगलांस्मृत्वानसाभिहृदयादहं॥ हृदयान्निर्गतासाक्षान्मंगलंदुर्लभंखलु॥ सर्वमंगलदानाथंरूपधरासर्वमंगला॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सा २३ ॥ प्रेरितः शंकरेणाद्य तारकासुरनाशने ॥ तन्नाशविघ्नसंधानां नाशः केन भविष्यति ॥ वसञ्चतुर्मुखासासाकोटिश
स्तनतारकाः ॥ अवध्यत्वेन निर्णीतो वधस्तस्य कथं भवेत् ॥ उन्मत्तस्तैर्वरैस्तेषां पिगवायसर्वलामरान् ॥ तेनामराधिकाराश्च स्व
पोनैव हृताः पुरा ॥ विचरस्तेधरापृष्ठे निष्ठुरश्चर्करावृते ॥ नारायणादयः सर्वे तदा निरवलंबना ॥ २७ ॥ तिष्ठंत्सभमतिक्रूरस्तारको यं
भुवनत्रयं ॥ करोति सव्यथं तस्य संहारः केन वा भवेत् ॥ २८ ॥ ईदृक्शाबीकुटीरस्मिन् जयंतनापि संवृतः ॥ स्वर्गलोकात्परिभ्रष्टः क
ष्टमाप्नोति कष्टधीः ॥ २९ ॥ तृणकल्पमभ्रहृज्जंवत्सरं डायते खलु ॥ योवृत्रहस्थाशक्तिः तस्य यासत्विनिर्गता ॥ यो यं नारायणः
पूर्वं पद्मया सहसादरं ॥ वैकुंठे संस्थितस्तस्य शक्तिरध्यति कुदिना ॥ ३१ ॥ आविलेकमेलसोपि तया कमलया सह ॥ निलीनोम्भोन
संघातनिहतो दुःखितोधुना ॥ यावापीरमवाः सोपि ब्रह्मारण्यमुपाश्रितः ॥ जीर्णपर्णकुटीवापि निकटे रटति स्फुटं ॥ नसरकर
संचारसरो दूरास्तमाश्रितः ॥ नद्रं चैवातीताराणां दूरवार्ताविशेषतः ॥ ३४ ॥ वातोवातशनैरेव तारकासुरमंदिरं ॥ दूरीकुर्वन्रजःपुंजं
शंकितो तारदुःखितः ॥ पाकक्रमेरतो नित्यं पावकस्तन्महानसे ॥ जनपायन दुःखेन कालं नयति दुष्करं ॥ ३६ ॥ धूमोपि धनयोगेन
दुःसहभ्रमन्महानसे ॥ तदा दुःखमिति ज्ञात्वा नेंधनमपेक्षते ॥ वरुणास्तरुणीं सकासदा स्वरमपीं गृहे ॥ तस्यैव सेचनं कुर्वन्नुख
धितिष्ठति दुःखितः ॥ सागरोपि स्वरत्नानि तस्मै दत्वा मुहुर्मुहुः ॥ रिक्तत्वमुलभो तो रत्नाभावविनिश्चयात् ॥ ३९ ॥ यद्यान्यानि
रत्नानि वक्रुनीति स तारकः ॥ द्रुतान्प्रेरयति व्ययः तदा किं कार्यमित्यपि ४० ॥ नायते यस्सहं रत्नान्यनंतानि पुनः पुनः ॥ किमुत्सन्ना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निरस्तानिकिं देयानीति दुःखितः ॥ वह्निरन्येपि सर्वे पि सुरास्तारकपीडिताः ॥ गिरिकंधरमाश्रित्य निलीनाः संति दुःखिताः ॥ मुनयो
पि वनं त्यक्त्वा फलमूलजलावृतं ॥ सामिहोत्राश्च रंस्यवनोरस्ते गिरिकंधरे ॥ ४३ ॥ भूधरापि धराधीरा तारकासुरविद्रुता ॥ सदा सफ
लसस्याढ्यापि ग्रामानापि सनवैः ॥ ४४ ॥ तारकासुरगंभीरशरीराभितते जसा ॥ अहोरात्रविवेकोपि नोऽधकारो न सर्वथा ॥ न तत्र
तिमटो लोके लोकालोकाचलावधी ॥ कौटुंबं त्वा सबैकुंठे स्वदारैः सह तिष्ठति ॥ तदग्रे विरजा नाम नदी दृष्ट्वा सतारकः ॥ भीतस्तद
ग्रेनायाति शालज्वालासमावृतां ॥ ४७ ॥ अतो नायाति कैलासं कालकालभयादपि ॥ अन्यथा तस्य गमनं तत्रापि स्याद् कुंठितं ॥ ४८ ॥
एवं संत्रस्तत स्तस्य तारकस्य दुरात्मनः ॥ अत्राकम एव संहारः सर्वधामीति मन्महे ॥ दुःखितास्तु सुराः सर्वे विचार्यान्योन्यमेकदा ॥ नारा
यणास्यनिलयं जग्मुस्ते कमलापतेः ॥ ५० ॥ रवघोतवदुल्लीनं तं कमलासहितं हरिं ॥ ऊचुर्विस्मयमापन्नाः शरण्यं किमहो तिनः ॥ देवाउ
चुः ॥ नारायणाधुना केन वा शरण्यं शरणार्थिनां ॥ प्रपन्नानां प्रपन्नानां प्रपन्नार्तिविनाशकं ॥ ५२ ॥ क्वतेधैर्यं क्वतेशौर्यं क्वते बहुपरा
क्रमः ॥ खद्योतरूपतामेत्य पद्मया सह तिष्ठसि ॥ ५३ ॥ मधुकैटभवैरि त्वं कुत्र वा गलमद्यते ॥ लज्जा न हन्त नाम किमिदं मधुसूदन ॥ ५४ ॥
अतः परं कथं सोरव्यं मीदृशीति गतिर्यदि ॥ कमलापतिता वा ते कथं वा स्थिरता मियात ॥ निलीनं त्वां न जानाति नूनं कमलया सह वि
मलाक्कमला तेन हृष्णे तस्यज्येत कथं ॥ असाविलेऽस्मिन्कमलेलीनोसीति न दृश्यसे ॥ अन्यथा तेन नीता स्याद्बलिना कमला खलु ॥ ५७ ॥
तव चेत्कुंठिता शक्तिरस्माकमपि कुंठिता ॥ शक्तिरत्र त्वया तावद् धैर्यं त्रियते कथं ॥ ५८ ॥ धैर्यमावहयत्नेन नारायणासुरेस्सह ॥

रामः
३०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

युद्धे हते तारकोपि हंतव्य इति सत्वरं ॥ मरणादधिकः किं नः कमले कमलान्वयः ॥ आविलेविमलस्यापि गतिस्तव किमीदृ
शी ॥ ३१ ॥ इत्युक्तं तद्वचः श्रुत्वा मरमाह हरिः सुरान् ॥ तारकं शोषयिष्यति त्वेव भीतः स्ववचनं मुहुः ॥ नारायणः ॥ तारकासुरहं
तृत्वं शंकाय स्मासु नामराः ॥ बहुवारं वयं तेन क्लेशेन विनिराकृताः ॥ तारकासुर हुंकारो यस्माकं महानिः खलु नैकोपि यत्र निपातेन जी
वनाशो करिष्यति ॥ तन्नेत्र तेजसा दग्धमस्त्रं मंडलमस्य मे ॥ नारायणास्त्रं मम्मद्वं चक्रं भस्म विशोषितं ॥ इदमस्त्र द्वयं सुरवं मम सा
रभवस्तु राः युद्ध साधनमस्माकमस्पन्नष्टमसंशयं ॥ शार्ङ्गं नष्टं गदा नष्टा शंखो नष्टस्तदा सुधान् ॥ नष्टो वा दुर्बलं सर्वं शरीर बलं मे
ततः ॥ अतस्तेन सहास्माकं युद्धवार्तापि दूरतः ॥ तन्नेजसा तिदूरेपि स्थातुमेव न शक्यते ॥ तन्नेत्र तेजः पातेन देहो मे चक्र सन्निभः ॥ ते
न हृष्ट्या इति ख्याति लोके जाता मम धुना ॥ ३४ ॥ युद्धं प्रसादाय यमधुना समुपागताः ॥ सातावदति दूरस्त्र वासेपि कठिनोत्र मे व
हूनां च्यवने रत्र यदि कोलाहलस्तदा ॥ स समागत्य सहसा हलोयास्यति तारकः ॥ यदुक्तं मधुवैरित्वे मयि संत्र मम अमराः ॥ सम मे ६
ध्या हामायया ताव लैटभोपि हतः पुरा ॥ सा गौरी लोक जननी महामायेति गीयते ॥ सा संहाररतारक्तः मोहयत्यखिलं जगत् ॥ महा
मायामोहितोहं भवतोप्यमरास्तया ॥ मोहितामुनयोप्यन्ये मोहमेष्यंति सर्वदा ॥ सा च मोह प्रवृत्तास्या जगतां मोहितं जगत् ॥ वि
नाशाय प्रवृत्ता चाद्दिन प्रभृति संशयः ॥ मधुकैटभ नाशाय विधिना संस्तुता शिवा ॥ तयात योर्विनाशोपि कृतयं वतयारतु वि
मुक्तिः परमा मम्या सर्जने पालने पिसा ॥ संहारेपि समर्था सा महेशस्यापरा तनुः ॥ तया प्यस्य विनाशाय कृतो यत्नः क्रियतामपि त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यनाशो भवेद्येव तस्मिन्नेव क्षणे सुराः॥ सुराणामसुराणां च सृष्टिपालननाशनैः॥ साक्रोशतीति महागौरी शिवानी सर्वमंग
ला॥ शर्वाणी पार्वती दुर्गा मृडानी विश्ववल्लभा॥ कामाक्षी सा विशालाक्षी शिवा त्रिपुरभैरवी॥ सिद्धेश्वरी च विकटा सेवका
त्यायनी स्मृता॥ वागीश्वरी महाकाली महिषासुरमर्दिनी॥ चंडमुंडप्रमथनी धूम्रलोचनमर्दिनी॥ निशुंभमथिनी देवी शुंभा
सुरविनाशिनी॥ सेव शाकंभरी लोके कौशिकीति च गीयते॥ दुर्गासुरविनाशेन दुर्गा देवीति गीयते॥ गौरी संहारकालेपि करुणा
रससागरा॥ रिपून्विपुलसेनांश्च शस्त्रप्रहरणादिभिः॥ महामायासमुत्पन्ना मायया कांचनप्रभा॥ संहारकारिणी सा त्रिमाया
तरविजृंभिता॥ तन्मायास्वरूपाणि निर्माय स्वयमेव सा॥ उत्पत्तिस्थितिसंहारान्करोति भववल्लभा॥ दृत्रादैत्यैः सुरास्सर्वे महा
मायाहताः सुराः॥ कैलासनगरद्वारस्वर्गलोकमुपागताः॥ ते विधन्याः सुरास्सर्वे यातेचासुरा हताः॥ नताहृशं वा भागमनः पुण्यै राम॰
रगणितैर्विना॥ अस्माकमपि नश्यंति दुरदृष्टानि सा शिवा॥ दुरदृष्टविनाशाय प्रसंगेनापि संस्मृता॥ ८८॥ अतः परं तारकाद्यामी ३१
तिजीता दुरत्यया॥ सा नाशं प्राप्नुयादेव गौरीस्मरणकारणात्॥ ८९॥ या सर्वमंगला नाम्ना तन्नामस्मरणे सति॥ शांभवानां निर्म
लानां मंगलानि पदे पदे॥ नूनं जागरणे तेषां मंगलानि प्रयच्छति॥ स्वप्नेपि सा मंगलानि मंगला सर्वमंगला॥ ९०॥ यद्धामां गमि
तिरम्यातां वेदेसा सर्वमंगला॥ मंगलानि तनुते सर्वप्रतिष्ठापमनाकुला॥ दोवानमंगलं प्राप्य मंगलापतिपूजया॥ स सर्वमंगला प्र
णो मंगलानि प्रयच्छति॥ सर्वमंगलया युक्तः तारकासुरनाशकं॥ जनयामास विश्वात्मा तारकं संहनिष्यति॥ अतः परं कियान्काले॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नेयास्माभिस्ततःपरं ॥ तारकासुरसंहारंसुकुमारःकरिष्यति ॥ समहेश्वरवीर्येणकुमारःसमभत्सुराः ॥ सवीराग्रेसरःक्रूरो
महागौरीकुमारकः ॥ सशौर्येणनमीतेनपोषितःशौर्यसागरः ॥ तारकासुरसंहारंक्षणेनैवकरिष्यति ॥ कुमारशरसंधानदहन
ज्वालयापरं ॥ तारकासुरसंहारोभविष्यतिनसंशयः ॥ इतितद्वचनंश्रुत्वानत्वानारायणंसुराः ॥ अहर्षेणापरंप्राहुःकृता
र्थोस्मीतिसादरं ॥ तारकासुरसंत्रासदवानलसमाहृताः ॥ शिवनामसुधासारैःशीतलाःस्मःकिलाधुना ॥ १०० ॥ कथंस्म
तोमहादेवःसंसाराग्निविनाशकः ॥ अकस्मादधुनादीनानास्मान्पालयितुंपरं ॥ सहृपालुर्नीलकंठःसर्वकंटकनाशकः ॥ क
रोतिमंगलंनित्यंक्षणार्धेनापिवास्मृतः ॥ प्रतिक्षणंमहादेवचरणस्मरणादराः ॥ हाराःपरमुदारास्तेनसंसारभयातुराः ॥ तए
वधन्यामान्याश्चधरणीमंडलेमुहुः ॥ येस्मरंतिमहादेवमुमालिंगितविग्रहं ॥ अहोमहदिदंभाग्यंसौभाग्यनिधिरेवनः ॥ गौरी
धवोधुनासाधुधारारूपेणसंस्मृतः ॥ ५ ॥ महादेवपदांभोजभृंगमंगसमंगलं ॥ तनूतमागमुत्तुंगमुद्दूत्तमयातमुद्दाः ॥ हरेपरा
त्परतरंतंमहानंदसागरं ॥ स्मृत्वानत्वापिदृष्ट्वावापरमानंदतांययुः ॥ ७ ॥ येयेद्वतार्थास्तेसर्वेसर्वदासर्वसिद्धिदं ॥ शंकरंशरणं
प्राप्ताःप्राप्तैश्वर्यमहोत्सवाः ॥ १०८ ॥ यद्द्वारगास्तुंगतुरंगकोटयोयद्द्वारिमत्तेभसमाघकोटयः ॥ तद्द्वारपालायनमोनमोनमःसशां
करद्वारविचारसागरः ॥ नशोभवानामशुभंकदाचित्तशोभनानांसदनेसुखानां ॥ तएवधन्याःपृथिवीतलेस्मिन्मान्याःसुराणांचन
रेश्वराणां ॥ ११० ॥ अस्माकंकृतपुण्यसंघविभवैरद्याधुनाशंकरेभक्तिःकाचनसापिमरुसहृद्भासतेघनंनिर्धनाः ॥ स्मृत्वातंसहृदयपा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रथनभ्रसो भाग्यवंतो ततः संतः नैपिवि लोनकोतत्कलसत्पादांबुजाराधकाः ॥११॥ संपूर्णकामं परमं अकामं निर्गंधकामं गिरि
जार्धवामे ॥ धृतार्धसोमं समधामधामं देवोत्तमं दैवतसार्वभौमं ॥१२॥ नूनं तं किमपि यत्सुराशिवपदांबुजाराधिनं तदेतदधुनासु
खं किमपि साधु सतेसुद्रुः ॥ इंद्रं न सुरधेनुभिः न मणिनापि कल्पद्रुमैः सुधानिधिनिमज्जनैरपि तु केवलं तेन नः ॥१३॥
॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे व्यासमुनिसंवादे नाम द्वादशोध्यायः ॥१२॥ ॥ श्रीशिवार्पणमस्तु ॥
॥ शिव उवाच ॥ एवं तु देकुमारोपि विचार्यादरपूर्वकं ॥ नत्वा नामाह विनयात्कृतांजलिपुटः शनैः ॥१॥ कुमार उवाच शंकरापा
रकरूपारससागर शंकर ॥ मदन्यादयनीयस्ते दुर्दैवो नैव दृश्यते ॥२॥ तारकासुरसंहारविहारचतुरो हरः स महावीर यस्यास्ति
श्रुतिस्मृतिशिरोमणिः ॥३॥ सृष्टिपालनसंहारान्करोति श्रीमहेश्वरः ॥ न तदन्यत्र कुत्रचित्कोपि सत्यपि श्रुतिरपि श्रुता ॥४॥ अतस्तारक रामः
संहारः कथं कार्यो मया प्रभो ॥ तादृशं नास्य सामर्थ्यं अन्यस्यापि न सर्वथा ॥ यत्कार्यकरणे शक्तो यस्तेनैव परं खलु तत्कार्य ३२
मिति नान्येन तत्त्वं तादृशं खलु ॥ यत्तेजसासुरास्सर्वे पराभूताः प्रतिक्षणं ॥ तद्वीर्यं दावदहनमसह्यमिति मेनिरे ॥७॥ त्वामा
मिति नान्येन ... ॥ कथं विधे
निवत्तेजः सुरसंहारमिच्छति ॥ स महाप्रलयाग्नीनां सम्यग्दह्वा तिष्ठति ॥ सहर्षं सुरगणाश्च तत्र ह्यायोपि सुरैर्मम ॥ किमेव
येविधिना सहनारायणो गतः ॥ स धुनातस्य वा नोदिनश्रुतावातकागतिः ॥ तस्य नारायणस्यापि विधेर्वा भक्तवत्सल ॥१०॥ अत
मुक्तया सृष्टिः तस्य संपादिता प्रभो ॥ तत्संहाराय यत्नोपि कथं मे तादृशो धुना ॥११॥ सकालकूटकूटानां कूटवल्लिलभां यतः अत

अतस्तस्य नसंहारे प्रवृत्तिरपि जायते ॥ नवटांकुरवत्तस्य संमतः परिपालनं ॥ सवृद्धः किं नरवछेद्यः शाखामंडलमंडितः ॥ क
थं विषतरुः सृष्टः सुराणामपि नाशकः ॥ कालकूटादपि भयं न सुराणामभूत्तदा ॥ तन्नेत्रतेजसां लेशः कालकूटवदन्वहं ॥ स्वर्गे
वर्गविनाशाय वर्तते सुरमंदिर ॥ तन्नेत्रतेजोवयवो यस्सह्यः स कथं मम ॥ सह्यः समाक्षाद्दग्नीनां समं हृत्प्रलयो सुरवः ॥ तत्संहार
प्रयत्नोपि प्रायस्याद्धि फलो मम ॥ अतस्तदर्थमधुना यत्नो न क्रियते मया ॥ यत्ने कृते यदि फलं न भविष्यति सत्वरं ॥ तदा चेतसि
वैकल्यमकीर्तिरपि दुस्तरा ॥ तस्मादागमनेनैव कालोनेयः कियानपि ॥ असह्य एव सर्वेषां ससंह्यः किं मयाधुना ॥ ततः पराजये
लोकेष्वपहासोपि जायते ॥ किं तेनायुषहासेन शराणामपि जीवनं ॥ यदि तस्मिन्महायुद्धे सन्नेद्धबुद्धिनाशके ॥ विपर्ययो भवेद्
दैयशोरद्धिस्तदा कथं ॥ उसन्निरवयशासः प्रथमे दुर्लभ्यतः ॥ कथं तद्बुद्धिवार्त्तापि विज्ञातानां तकेशांकर ॥ २२ ॥ सर्वेषाममलकेन
कृतोतः प्रथितः कथं ॥ न प्रेष्यते तद्वधाय तद्वधं न करोति किं ॥ २३ ॥ कथमस्मद्वधस्यास्य तद्वधेतेति चेत् ॥ तर्हि संहारतवापीश
ममत्रिदृशाडुईश ॥ तदायुः परिमाणं च न कर्तुं युक्तो मनः ॥ अतस्त एव दुर्वाच्यं त्रोधिनः कालकालालमिस्सलं ॥ २५ ॥ इस्कंतत दुर्चः
श्रुत्वा मयैवं समुदीरितं ॥ तदादरेणाशृणु मे गणेशावचनं पुनः ॥ २६ ॥ सत्यमुक्तं कुमाराद्यतारकासुरसन्निभः ॥ नाधुना वर्त्तते वी
रो न भविता न भविष्यति ॥ २७ ॥ तथापि ते विचारः कः कालिकास्यायनीस्मर ॥ कालिकालीति कालीति स्मरन्युद्धे जयं लभेत् ॥ उ
मा गौरि महागौरी महाकालि शिवा सती ॥ शर्वाणी चंडिका दुर्गा रुद्राणी गिरिकन्यका ॥ मृडानी पार्वती माया महामाया महेश्वरी ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अपर्णाज्ञा भवीभद्रा शुभा त्रिपुरभैरवी ॥ श्रीः सर्वमंगला लक्ष्मीर्भवानी दक्षकन्यका ॥ आर्या हैमवतीत्येति स्मृत्वा जयमवा
प्नुयात् ॥ एकैकमपि यन्नाम गौर्यास्तद्दुःखनाशकं ॥ जयदं धनदं चैतत् आयुर्वृद्धिकरं परं ॥ ततः कुमारस्तां गौरीं स्मृत्वा युद्धाय
याहि ते ॥ जयो भवत्यसंदिग्धं तन्नाम जयदं यतः ॥ २३ ॥ स्मृत्वापि गौरीं गिरिराजकन्यां धन्यां च मान्यां च कलंकशान्त्यो ॥ दुर्गामनन्या
मपि भावयंतः सद्यो भवंति वहि भाग्यवंतः ॥ २४ ॥ स्मृत्वापि यां पातकसागरस्था निर्यांति संगतस्य च सौख्यसंघैः ॥ स्वर्गं समेत्याप्य
पवर्गमेत्य तिष्ठंति भाग्येन नराः शिवा सा ॥ यद्दृष्टिपातेन जगत्समस्तमुत्पन्नमेतत्परिपालितं च ॥ कल्पावसाने प्रलयं प्रयांति सा
द्वतां मंगलदेवताया ॥ यत्प्रसादपद्मस्मरणान्मुनीनां तपस्ययाकेवलमंबिका सा ॥ स्मृता सदा सर्वसुखप्रदात्री सैशा विधात्री सुख
सागराणां ॥ २८ ॥ यामन्नपूर्णां प्रणमंति देवाः स्तुवंति गंधर्वगणा मुनींद्राः ॥ सर्वाश्च तस्या रजःप्रसादाद्रमादयः सारवलुधज रामः
नीया ॥ यस्याः कटाक्षप्रसरेण धन्या इंद्रो हरिर्द्रः कुवेरोपि धन्यः ॥ मान्यः सुराणां धनसागराणामधीश्वरः स्यादिति तां भजे ॥ ३२
वां ॥ ३९ ॥ यत्पादपद्मांबुजरेणुलेशं दधार शौरिर्धृतकर्मरूपः ॥ शेषः सहस्रे परंधारमूर्ध्नि सैषा भवानी शुभराजधानी ॥ ४० ॥
कुलाचलैर्मेरुसमानधैर्यैरस्ति प्रयत्नेन विभुग्नकायैः ॥ यत्पादपद्मांबुजरेणुलेशो धृता मुदा सा गिरिजा मुदा वा ॥ दिग्दंतिभिर्य
त्पदपद्मरेणुर्धृतस्तु कुंभस्थलयं दिक्कलेपि ॥ महांबुधारापरिवीतगात्रैः स्तज्जारपायासगतः स्वतंत्रैः ॥ यत्पादपद्मांबुरुहार्चनाय
रत्नाकरानंतनरत्नजालं ॥ संपादयत्यन्वहमादरेण सा किं न गौरी तत्पजनीया ॥ इत्थं स्तुतिर्मे सुखपंकजोत्थामरंदधारेव मुदा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भवान्याः ॥ मुदंप्रवृत्तास्कशुभायनित्यंजयायसौभाग्यसमृद्धिहेतुः ॥ अतःपरंसत्वरमेववृंदेःगौरिपसंगोरुहवीक्ष्यमाण ॥
कुरुप्रयत्नंकुरुमाविलंबंलंबोदरालंबनसंभ्रमाणां ॥ ४५ ॥ एकाकिनश्चैत्तवतत्रगंतुंमनःप्रवृत्तिर्नतदातथापि ॥ कुमारमभ्येत्य
सहायभूतंसतावदेवानवलोकनार्त्तः ॥ ४६ ॥ तेनापिशीघ्रंतवकार्यमद्यकर्त्तव्यमेवेतिविनिश्चयोमे ॥ तस्यास्त्यशक्यंनकिमप्य
तस्त्वंविचारनीयंगमनेगणेश ॥ ४७ ॥ एकेनतेनैवमदिष्टकार्यंसिध्यत्यवश्यंसतथाविलंबं ॥ नकर्त्तुमिच्छत्यतिसूक्ष्मबुद्धिःसहृ
द्भृतंवेदसकिंनवेद ॥ ४८ ॥ समन्वितोयोगोद्यतचित्तवृत्तिः निवृत्तिरथ्यस्त्यपराधभीतेः ॥ तच्चित्तवृत्तेरनुवृत्तिरस्मिन्नसंशयोयंमतिःश्रु
तेगीतकीर्त्तिः ॥ ४९ ॥ तस्याधुनैवागमनेविलंबस्त्वयानकार्यःसहसाविलंब्य ॥ नतस्यसंघःसदृशःसिद्धसंघसिंहासनाद्रष्टुम
पिप्रवृत्तः ॥ ५० ॥ यद्वीर्यवार्त्ताश्रवणेपितारःसतारकःसर्वसुरांतकोपि ॥ त्रस्तःसमस्तासुरभूमिरस्तःसवस्तुतःतावदतिप्रशा
स्तः ॥ ५१ ॥ एकःकुमारोजगतीतलेस्मिन्कुमारनाम्नाप्रथितःकुमारः ॥ कुमारत्वेतिकुमारबुद्धिःकुमारमात्रंममढिंभढुंढे ॥ तेनाकु
मारेणकुमारतापिप्रदर्शिताकार्यविशेषसिध्या ॥ संसिद्धसाध्यार्थिनसिद्धबुद्धिर्नबुद्धिमानत्रनयातिधान्यः ॥ गौरीकुमा
रेणकुमारसत्यासतेकुमारेनतथातदन्या ॥ नतादृशःकोपिकुमारवर्गेकुमारवृत्तीनतथाकुमारः ॥ मदुक्तकार्येनविलंबशंका
लंबोदरेणवाचरणांबुजस्य ॥ आलोकनेनतस्यरवकुत्वरास्यासातेविलोकयप्रमुदाभवित्री ॥ दृष्टेकुमारेगिरिराजकन्याविन्यस्यका
र्यंतरमाशुतेन ॥ सालिंगिताक्षीरसहस्रधाराधाराधरास्यच्चकुचाभविन्नी ॥ दृष्टेकुमारेगिरिराजकन्यास्नेहःपरंक्षीररसस्मैस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गौरीकुचद्वारवेरणात्तावद्भिर्निर्गतस्याद्धिहरद्यत्नं ॥५७॥ कुमारसंगागमने प्रवृत्तिं श्रुत्वापि गौरी विगतान्यवार्त्ता ॥ कुचौ पयः प्रस्न
चणाग्रवृत्तौ दृष्ट्वा मुहुः स्मेरमुखा —— भविता ॥५८॥ सुमेरवद्भिर्गुणीकृताति रुचिर क्षीरप्रसारं मुहुः पश्यंती कुचकांचनाचलशि
म र:संस्मानननाभ्युघता ॥ स्कंदालिंगनलालसापि कंचुकैः क्षीरं गृहीत्वा मुहुः किं नायास्यति मत्सुतः सुत इति प्रेम्णा बुधाराशिवा ॥५९॥
सा गौरी सुखराशिरेव सुहृत:श्रेयोसुधासागरः सौंदर्य द्रवनाहिनीव सततं सावाहिनीसंपदां ॥ आपद्राशिविनाशिनी खलु म
ह्मापापाद्भानिः सा शनैः रतले शयनं समस्तशमुमामह्यं प्रदास्यत्यपि ॥६०॥ गौरी शारदपूर्णचंद्रवदना दृष्ट्वा पदं पृष्ठे मुहुः कष्टे दु
ष्टमपाकरिष्यति मुहुः स्पष्टासुखाभोलिधिः ॥ सष्टिवासृष्टिविचक्षणा खलु मुहुः दृष्टिं प्रवृष्टिं परं स्पष्टुं दृष्टि विशेषपोषित तनु रामः
कुर्याद्दृष्टान्वितं ॥६१॥ भाग्यैर्भूरितपःप्रभावभवनैः संभावनीया मुहुः भक्ताभीष्टफलप्रदाननिपुणा सातिप्रवीणा क्षमा ॥ आ ३४
तत्पिसृष्वादाग्र तिक्षयामतिभ्लक्ष्यां भवानीकराद्दृष्ट्यानयनभ्रमापहरणं कर्तव्यमत्यादरैः ॥६२॥ धन्यानां भवने पुसा गिरि
सुता विन्यस्यपादौ बुजं स्थित्वा वाक्षणमात्रमाहरयुतांतं द्वारपालांगणा ॥ इच्छंती कमलाविलासमसकृत द्वारपालांगणा या ल
त् सततावदातमुस्मृतएवशंभो शुभानि संततसुतरां तनुतानि॥ ३४॥ संतानसंघातसमोहवृद्धिः समृद्धिरीशानपदे स्मृते मे॥ संभाविता
तातविमुक्तिरंते निरंतरायासुरवृंदवंद्या॥ ३५॥ यत्ते महादेवपदारविंदमानंदधाराबुदसुंदरं मे॥ आनंदमत्यद्भुतमातनोति संदर्श
नात्स्वपिनाकपाणे॥ कल्याणराशिः समुदेति वृद्धिं नश्यंति महापातकपर्वतोपि॥ आनंदगंगाविनरंगभंगसंगेन सिक्तं कुरुते मनो मे॥ ३७॥
सपारपुण्यानि फलानि मुख्यानि तपांसि दानानि अमितानि तानि॥ आनंदगंगावृद्धिसमृद्धमतिप्रवृद्धाममचंद्रमौले॥ ३८॥ त्वत्पाद
पद्मस्मरणेंदुधारा ध्यानंदधारां तनुते विचित्रां॥ त्रिणेत्र तत्सात्र महत्पवित्रं तन्नेत्र संसर्गविधूततेत्रं॥ यत्पादसेवानिरताद्भुतार्थाः सुरेंद्र
लोकादिपदार्थमात्रं॥ वांछां न कुर्वंति सुमेरुहस्तो हस्तेन किं वा यवसं विधत्ते॥ त्वत्सेवया केवलमिंदुमौले लक्ष्मीः पुरो धावति वंदिरूपा
वापीचवापीरमणं विहाय द्युमासहाया स्मरणानुरागो॥ योगैर्न योगैरपि सागरांतमहीप्रदानैरपि गोप्रदानैः॥ सुखान्यपाराणि न
चंद्रमौले त्वत्पादुकाराधनहेतुकानि॥ अपारसंसारमहांबुराशि विशोषणाय स्मरणं तवैव॥ महाग्निकल्पसतिपातकाग्निधाराध
रत्यतदुमासहाय॥ ४३॥ ममत्वदीयश्चरणाः प्रभूतमैश्वर्यमाकल्पमनन्यलभ्यं॥ संपादयत्येव विमुक्तिमंते किमन्यदत्रापि वरायपसे
ग्यं॥ ४४॥ यस्मादिहामुत्रसुखप्रवाहस्त्वत्पादपद्मानुविलोकनेन॥ अतः किमन्यद्वरणीयमद्य यद्यस्ति तन्मे वद सावधानं॥ स्वर्गापव
र्गप्रदमित्येवमि निधानदानक्षममित्यवैमि॥ त्वत्पादुकाध्यानमतामहेशा किं देयमथास्ति जगत्त्रयेपि॥ अतः परं केवलमिंदुमौले त्वत्पा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रपद्मस्मरणानुरक्तिः॥ विरक्तिरप्यंबुजलोकवासेप्यस्तसंसारेस्मरमामनाथं॥ अनाथनाथस्त्वमुमासहायमोमेधनाथं शरणा हरि
गतत्वां॥ प्रपन्नमंदारहरामरेशत्वयासनाथं कुरुमामनाथं॥ ४८॥ यत्तेपदांभोरुहमंबुजादिमनःसरोजासनसन्निविष्टं॥ तत्कष्टना रामः
शायसमर्थमेवस्मृतंकदाचिन्मरणक्षणेवा॥ ४९॥ अर्थेंदुमौलेमरणक्षणेमेविभूतिरुद्राक्षविभूषणस्य॥ त्वत्पादपद्मस्मरणानुरागो ६९
भवत्वयंतातत्वप्रसादात्॥ ५०॥ तातस्त्वमेवासिममेंदुमौलेमाताभवानीभुवयोःप्रसादात्॥ महेश्वराराधकसंततिर्मेसदाप्रवृद्धास्त
वरोयमेकः॥ मत्संततिः शंकरपूजनेनदिनेदिनेवृद्धिमुपैत्वनित्यं॥ करोतुगौरीरमणांघ्रिपूजांप्रजाधनप्रापणहेतुभूतां॥ लोकेमहेशा
र्चकपादुकार्चाधनार्जनासक्तधियोमहांतः॥ सुखानिभुक्त्वासुकृतैरुदारैःकुमारैरपिभाग्यवंतः॥ अनंतकल्याणपरंपरायांनिदानं
मोक्षास्मरणंवरेण्यं॥ तदेवतावन्ममसर्वदास्तुमत्प्रार्थनीयंचतदेवशंभो॥ ५१॥ शंभोभवानीरमणप्रभोमांतद्दासदासादिपरंपरायां
विलोकयत्वापाहिकृपानिधानगतिस्त्वमेवासिममेंदुमौले॥ ५२॥ त्वमेवमातासिजगज्जनित्रीप्रियेमहेशस्यपितात्वमेव॥ महेशतस्मा
दवहीनबंधोदयारसार्द्रक्षितप्रसारैः॥ ५३॥ अपारपापप्रलयानलस्त्वंत्वत्पादपद्मस्मरणंक्षणंवा॥ अक्षीणपुण्याभवतोनलभ्य
स्त्वमीशतेपादमनुस्मरामि॥ श्रीकालकालहृदयेकरुणामिनित्यं त्वांकालकालमहिलेकलयंतुनेत्रे॥ मच्चित्तमस्तकभुवयोश्चरणार
विंदे वंदेमुहुर्मुहुरहंविजहामिमोहं॥ हेभूतनाथभगवन्गिरिजासहायहेगौरिदेविगिरिजेशिववल्लभेमां॥ पाहिस्मरांतकयमांतक
चंद्रमौलेपाहिस्मृतापिमधुकैटभहंत्रिधात्रि॥ ५४॥ पाहिप्रभोभवभयापहमोहघ्नोपाहित्रिलोचनसुरासुरसार्वभौम॥ पाहिप्रबोध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जननिभ्रुउयावसानश्रीफालले चनविहारीविनोदलोले॥ ६०॥ पाहिप्रपन्नसुरलोकविलोकनेनत्कृत्वासुरारिविलयं करुणानिधा
न॥ पाहिस्मरारिकरचारुविचारितांगि श्रीमंगलसकलमंगलदानलोले॥ ६१॥ पाहिप्रसीदशिवभक्तमनन्यधन्यमान्यंमदन्यमपि
धन्यमनन्यचित्तं॥ पाहिप्रसादसुमुखैः करुणाकटाक्षैः दासायपीप्रयपातपापविनाशदक्षे॥ ६२॥ पाहित्वमेवगतिरित्यनुवारमीश
त्वत्पादपद्मभजनं करवाणिवाणि॥ सेषाममस्फुरतुपाहिशिवभवानित्वत्पादपद्मभजनेमतिरस्तुनित्यं॥ पाहिस्मरारिहृतेत्वरणा
रविंदमंदारकुंदनवबिल्वदलादिपूज्यं॥ पाहिस्मरामिगिरिराजसुतेत्वदीयपादांबुजंत्रिदशचित्रकलत्रपात्रं॥ ६४॥ वंदेसर्वसुरासुर
प्रभुमुमाकांतंप्रशांतंमुदुःसंतानद्रुमपुष्पमंटपमहासिंहासनाधिष्ठितां॥ आनम्रामरवृंदमौलिविलसत्कोटीरदिव्यप्रभापुंजव्याजितपा
दूकंतवभजेमृत्युंजयावामं॥ त्वामाराध्यतमंवदंतिमुनयः सोमावतंसप्रभुंवेदांताअपिसंस्तुवंतिभगवन्त्वत्पादपद्मंमुदुः॥ त्वद्रूपंवि
दितंनयोगनिकरैर्यागैश्चदानैस्तथादीनानासवनैश्चनिश्चितमिदंसर्वात्मनाशंकरः॥ ६६॥ शर्वाणीकुचहेमकुंभविलसत्काश्मीररेणुप्रभा
पूरापूरितदिव्यकांतिरुचिरंत्वत्पादपद्मंमुदा॥ वंदेसुंदरमंजुशिंजाकरतलालंकारसाराकरंवारंवारमनुस्मरामिसकलाभीष्टप्रदानाक
रं॥ ६७॥ कारुण्यामृतसागरामरवरापारानतिव्यत्ययात्यस्तोत्तनपादुकामितमपिभीरंजितमंकुरु॥ त्वामेवाहमुमागतःशरणमि
त्यर्थेहुमोरुस्मरस्मर्तव्येघहमेकएवभगवन्किंनावशिष्टःप्रभो॥ ६८॥ कल्याणानितनोतिमितवपदांभोजंविपत्संततिं दूरीकृत्यमहाघ
सागरमहाकल्लोलमालामपि॥ लीलोत्खलुकालकालजगतांसृष्टिस्थितिध्वंसनान्मायासोपिनतत्रतेसततमप्येतन्नवेक्षेऽहं॥ ६९॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मामामुंचमहेशामामधिकयाम भागधेयं प्रियं शंभो त्वच्चरणारविंदभजनं तन्मे निधिस्त्वं दृनं ॥ तन्मे सौख्यमहांबुधिश्च नरखो या
याप्यपायांबुधेरानंदांबुधिर्वीचिकादिरचना चातुर्यमर्यादशः ॥२०॥ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये नृतीयं
शंभ्वासहमुनिसंवादे नाम पंचविंशोऽध्यायः ॥२५॥ ॥ व्यास उवाच ॥ इति तद्गिरिमाकर्ण्य सकारुण्यार्णवः क्षणं ॥ सापर्णास्ते विलोक्याह व
चनं च सुधामयं ॥ ययेयं भवत्कृता पूजा त्वया तुष्टोस्म्यसंशयं ॥ स्तोत्रेणानेन सुतरां तुष्टः पुष्टोस्मि शंभवा ॥ २ ॥ वरोयः प्रार्थितो भक्त्या सोपि
दत्तः किमादरात् ॥ किमदेयं ममाप्यस्ति मद्भक्तेभ्यो विशेषतः ॥ ३ ॥ भवद्भिर्यत्कृतं स्तोत्रं तत्पठेद्यः स बुद्धिमान् ॥ तस्से तति प्रवृद्धा स्यान्तदै
श्वर्यं च प्रवर्धते ॥ ४ ॥ इत्युक्त्वा नत्कृतां पूजां गृहीत्वा सादरं हरः ॥ तत्रैवांतर्दधे विप्राः कोटिशो गणसेवितः ॥ ५ ॥ ऋषय ऊचुः ॥ कथा पापहरा सेयं
सुधारूपा श्रुता भुने ॥ पुनः कुत्र स्थितं दिव्या सह देवेन शंभुना ॥ ६ ॥ व्यास उवाच ॥ ततः कैलासमगमद्गिरिजावल्लभः प्रभुः ॥ तत्रोपवनमा
साद्य विहारनिरतोऽभवत् ॥ रम्योपवनमध्यस्थरत्नमंटपमध्यगे ॥ रत्नसिंहासने स्थित्वा गौरीमाह हरो गिरं ॥ ७ ॥ पश्य बिल्वतरूनौरि बिल्वां
कुरसमावृतान् ॥ शिवालिंगार्चनरतान् गत्वागत्वा पुनः पुनः ॥ ८ ॥ पश्य प्रसूनवल्लीनां कुलं यातिप्रतिक्षणं ॥ शिवलिंगार्चनायाशु प्रस
नफलसंकुलं ॥ पश्य पश्यारविंदानि सुंदराण्यतिसुंदरि ॥ मंदमारुतसंवीतमंदारकुसुमान्यपि ॥ विपुलानि विचित्राणि रसधारांचि
तान्यपि ॥ पश्य पश्येक्षुदंडाग्रफलमंडलमंबिके ॥ तद्रसं च सुधाधारारसधिःकरणक्षमं ॥ अभूतपूर्वमेवास्मिन्वने सर्वमिहांबिके पश्य
पश्य विनोदेन परमानंदसाधनं ॥ १४ ॥ शोभामभिनवामेनां पुनः पुनरनुक्षणं ॥ दृष्ट्वा गौरी महादेवं प्राह विस्मयसंयुता ॥ शंकरापार

पश्यांकुरेषु पक्वानि फलानि विविधान्यपि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपारसस्सागरसागर। सागरं वदवृत्तांतं वलस्यास्य विशेषतः ॥१६॥ अमी किं तरवो लोके सांकुराः किं चरंत्यमी। शिवार्चेना
यपुण्याद्यैः स्वत एवातियत्नतः ॥१७॥ ॥श्रीसदाशिव उवाच॥ पुरा हिमगिरेरेकं धेरपुमुनीश्वराः॥ तस्यां घोरेण तपसाश्रांताः स्थि
तानिरंतरं। कल्पावसानपर्यंतं स्थितास्ते स्वतपोबलात्॥ ततः परं प्रसन्नोऽस्मि तेभ्य एव शुभानने। ततस्ते त्वां प्रार्थितोऽपि नरस्तैरेव शै
लजे। अन्यैरप्रार्थितः पूर्वं अपूर्वं स वरः शिवे ॥२०॥ यस्त्वं वले: कृतो गौरि तं त्रपापहरं शृणु। वरं स्वरूपं वक्ष्यामि तत्प्रार्थितमनाकुलं ॥२१॥
रूपयतुस्तु। वंदे सुराराधितमिंदुमौलिं वंदे भवानीरमणं महेशं। वंदे महामेरुशरासनोरुकोटिप्रभाकूटविघट्टितांगं॥ वंदे महानंदसमर
प्रदानं विहारलोलेरवलकालकालं॥ वंदे पुरश्रीपरिहारहेतुं वंदे स्मरारातिमुमासहायं ॥२३॥ वंदे तमर्धेंदुकलावतंसं तारावि हाराकर
संवृतांसं। वंदे मनोमानसराजहंसं वंदे भवानीस्मितमंदहासं ॥२४॥ वंदे मुकुंदाद्यमरासुराणां वंद्यं च वंदंतगणास्तुतं वा॥ वंदे प्रपन्ना
र्तिहरं परं तं वंदे मुहुः शंकरमेव वंदे ॥२५॥ वंदे जगत्सर्गविधानहेतुं वंदे जगत्पालनहेतुमीड्यं॥ वंदे जगत्संहरणक्षमं त्वां वंदे भवानीमुख
पद्मभानुं ॥२६॥ वंदे मुहुः संहृतकालकूटं वंदे स्मरारिं मदनांतकं तं। वंदे तमंधांधकदुर्मदांधमहांधकारप्रलयानलं तं॥ वंदे मुदा तं गि
रिराजकन्याकुचांचकाश्मीररजः कपोलं। वंदे मुहुः फालविलोचनं तं वंदे त्रिशूलस्फुरदर्धहस्तं ॥२८॥ वंदे धुनस्त्वं मृगशावहस्तं वंदे
शिवाश्लिष्टतवामभागं॥ वंदे विभूतिस्फुरदुज्ज्वलांगं रुद्राक्षमालाकुलभूषणं तं ॥२९॥ वंदे चतुर्वर्गफलप्रदं तं वंदे गणाधीश्वरकेतनं तं
वंदे जटाजूटतटाभिघातविस्रस्तनक्षत्रगणावृतं तं ॥३०॥ व्यास उवाच। इति स्तुत्वा महादेवं ते सर्वे मुनयस्तदा। वरं देहि महादेव
CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रुद्रोत्तम शंकर ॥ प्रसीद नः प्रभो शंभो प्रपन्नार्तिहराधुना ॥ दृष्ट्वा स्तरूपेभ्यः कैलासं गिरिजापते ॥ कैलासे खलु लिंगानि संति
दिव्यानि कोटिशः ॥ तत्पूजनोपयुक्ताः स्मस्वतः स्वजसवैस्सदा ॥ ३३ ॥ नाराधितानि लिंगानि भस्मवैः खलु सर्वः ॥ अतो गतं वृथा जन्म त
पसा केवलेन न ॥ किं केवलेन तपसा देहशोषकरेण नं ॥ व्यर्थं गतमिदं जन्म न कृतं लिंगपूजनं ॥ स जीवन्मृत एवेति निश्चितो निगमैरपि
यन्नाराधितं लिंगं शांगमंगलसाधनं ॥ बिल्वपत्रैः प्रसूनैर्वा फलैर्वा विमलैर्जलैः ॥ शिवार्चनं नैव न कृतं तज्जन्म विफलं खलु ॥ लिंगप्र
सन्नमेकं वा नवं बिल्वदलं मुदा ॥ यन्न दत्तं सम्प्रयत्नानां निलयस्याद संशयं ॥ ३८ ॥ अनुग्रहः परः शंभो कृतोऽस्मासु त्वयाधुना ॥ अनेनानुग्र
हेणापि नत्रास्मक्तरूपता ॥ शिवपूजोपयुक्तानां तस्मात्मलयोऽसति ॥ अपपौलमणा वासिभिर्वनैरिति श्रुतिः श्रुता ॥ ४० ॥ अतोऽस्माकं
वरानेतानीप्सितान्द हि शंकर ॥ कृपा विधेया यदि ते शैवेन पुंकरुणानिधे ॥ ४१ ॥ तदा वृक्षत्वमस्माभिः मधूतं त्वत्प्रदीयतां ॥ विलक्षणतरू रामः
त्वेन स्थितिरस्माकमीप्सिता ॥ ४२ ॥ इति तद्वचनं श्रुत्वा तथास्त्विति महेश्वरः ॥ तेनैवात देवे वसाः तस्थौ ति मभिवर्धयेन्नं ॥ ऋषयस्तु चु ७१
नयादानं च पूजा च यागाश्च नियमा अपि ॥ शिवप्रसादपर्यंतं तत्प्रसादफलं यतः ॥ प्रसन्ने सति गौरीशे पुनरन्यत्फलं तु न ॥ फलानां फ
लमुत्कृष्टं प्रसादः शांकरो यतः ॥ ४५ ॥ व्यास उवाच ॥ न तायते प्रभावोऽयं महादेवस्य शूलिन ॥ वर्णितोऽर्यते स्तस्य महिमा केन वर्ण्य
ते ॥ नीतं जन्म समुदायेन महेशपरिचर्यया ॥ स एव धन्यः पुण्यात्मा स देवैरपि पूज्यते ॥ येनान्वैनं महेशस्य शिवलिंगे प्रयत्नतः ॥ न कृतं ताह
शं जन्मनवरं संप्रमुच्यते ॥ पत्रैः फलैः प्रसूनैर्वा नैवेद्यैर्वांकुरैरपि ॥ संपूज्यः श्रीमहादेवो देवपूज्यः प्रजायते ॥ अत्रैवोदाहरंतीममितिहा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संपुरातनं॥ श्रवणेनापि भक्तिः स्यादितिहासस्य केवलं॥ पुराश्रीगिरिदेशे च कश्चिद्दासिन्नराधमः॥ स हरिद्रोति कृपणः क्षुद्रवनमास
माश्रयः॥ स्थित्वा श्रान्तः पोषेषु परहिंसापरस्सदा॥ ततस्स भिल्लवेषेण मृगयानिरतस्सदा॥ अरण्य पक्षिजातानां मृगाणां च विशे
षतः॥ मरणाय प्रवृत्तोपि न तद्धिंसां करोति सः॥ अशक्तस्य कथं तेषां हिंसा तेन भविष्यति॥ तस्माद्दासाय मासीनो विपिने दुर्दशाश्रयः
स्वतो मृतो भवेत्पक्षी यदि कश्चित्तदा सतं॥ साशयपाति सद्नं तेन तस्यापि जीवनं॥ कलत्रस्य सुतानां च कल्पितं तेन जीवनं॥ क्षुधातुराः
सदा सर्वे ततोप्यास्ते क्षुधातुरः॥ बृहती फलजालानि समादाय कदाचन॥ स भक्षणार्थमुद्युक्तः पाकं कृत्वा क्षुधातुरः॥ तदानीं बृहती
पुष्पमेकमादाय तत्क्षतः॥ बालकः प्रक्षिपन्भूमौ तल्लिंगे पतितं ततः॥ ततस्स दैवात्क्षुधया तत्र पंचत्वमागतः॥ तदानीमागताः क्रूराः कोटि
शो यमकिंकराः॥ ५९॥ ततो नीतो यमभटैः पतितो पि यमांतिके॥ ततो दूराद्विलोक्यापि तं कालः कंपमागतः॥ तदा कालश्चित्रगुप्तं प्राह
कंपसमन्वितः॥ अहो किमिदमाश्चर्यं पश्य पश्येति सत्वरं॥ अद्याद्भुतमिदं दृष्टं दुश्चिन्त्यमपि जायते॥ भयं च हृदयारूढं किं कर्तव्यमतः प
रं॥ ६२॥ त्रिशूलपाणेस्तस्य दर्शनेन भयं भवेत्॥ कंपोपि भवति स्पष्टं तथा शिवगणादपि॥ अधुना तादृशं किंचिन्न दृष्टमिह सर्वथा॥ एवं
सत्यपि कंपो येऽद्भुतो वा मम जायते॥ अधैर्यं च समुत्पन्नं को यमानीय पातितः॥ दूतैरज्ञैर्मदीयैस्तैः अधुना तद्विचार्यतां॥ प्रायशः सोय
मुत्कृष्टो ध्यानीतस्ते दुरात्मभिः॥ अतः परं मया तस्य शिक्षा कार्या प्रयत्नतः॥ इति तद्वचनं श्रुत्वा चित्रगुप्तोपि विस्मितः॥ यममाहाति धीरो
दूतान्वीक्ष्यापि तं ततः॥ ६०॥ चित्रगुप्त उवाच॥ अहो किमिदमारब्धं महादेवेन तन्मनः॥ कथं भाविकदा किं वा करोतीति न विद्महे॥ महेश्वर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्वनेत्रेसौकरुणारससागरः ॥ विभवास्तस्यबहवस्तेषांसंख्यानदृश्यते ॥ तस्याधर्माधर्मेप्यास्तिकूपायदितद्वापरं ॥ ससर्वभाग्य
संपन्नः कैलासमपियास्यति ॥ अनेनयत्कृतंपुण्यंमत्तस्सच्छृणुसादरं ॥ श्रुत्वापियस्यमाहात्म्यंमुक्तोभवतिमानवः ॥ यतस्यतुपितादु
ष्टोनष्टोधर्मविवर्जितः ॥ नानापातकसंक्रांतोदरिद्रोव्याधिपीडितः ॥ ७२ ॥ भ्रातरोप्यस्यदुष्टास्तेमातादुष्टास्वभावतः कुलंचदुष्ट
मेतस्यादरिद्रजनसंकुलं ॥ एतत्कुलेसमुत्पन्नैरन्नमन्नमितिव्यथा ॥ कृत्वैवस्थीयतेनान्नंलभ्यतेकेनकेरपि ॥ ७४ ॥ मरणावसरेप्राप्ते
वहतीकुसुमंपरं ॥ विच्छिन्नंमलिनंक्षिप्तंतच्छिंगेपतितंयम ॥ तावतागिरिजाकांतः संतुष्टः कष्टनाशकः ॥ स्वदूतानाहतंशीघ्रंमानयं
त्विति पुण्यकैः ॥ अतः परंसमागत्यकिंकरिष्यतितेगणाः ॥ तज्ञाजानंयमातोयंमंकोऽप्यहंकृयः खलु ॥ ७५ ॥ अतः परंसमागत्यपाशैर्बध्वा
दृढंयम ॥ भवंतमपिनेष्यंतिमामपयन्ननसंशयः ॥ दूतानामत्रकावार्त्ताहितानमरणेतव ॥ अतः परंक्वगंतव्यंअस्माकंस्थलमेवना ॥ ७६ ॥ य
त्रापिगम्यतेतत्रसमागत्यगणास्ततः ॥ समागत्यनयिष्यंतिबध्वापाशैर्दृढैर्यम ॥ दूतानांचत्वयाशिक्षानकृतापूर्वमादरात ॥ एतएवा रामः ८७२ अ
पत्तयातिकेनस्यान्तन्निवारणं ॥ ८१ ॥ अविचार्यकृतंकर्मदूतैरेतैर्दुरात्मभिः ॥ अतोदुःखसहस्राणितवसंभावितान्यपि ॥ प्रमादोदुःख
हेतुर्हितेनदुःखमवाप्यते ॥ किंचनज्ञातमस्माभिः शिवतत्त्वंतथासति ॥ ८२ ॥ अशिक्षिताश्चदूतास्तेतत्तस्तैरनुष्ठितं ॥ संभावितानि
दुःखानिमहापापफलान्यपि ॥ अतः परंवायत्नेननमान्यविशेषतः ॥ पूजयस्वयथाकामंप्रमादोमास्तुसर्वदा ॥ व्यासः ॥ एतस्मिं
न्नंतरकालेशिवदूतास्समागताः ॥ महेशप्रेषितास्सर्वेविमानवरमाश्रिताः ॥ ८४ ॥ तेसमागत्यतरसापाशैर्बध्वायमंमुदा ॥ संत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अनेनतुमुख्यक्ताः तदा ब्रह्मासमागतः। विष्णुस्समागतः पश्चाद्विंद्रेणसह सत्वरं। ततस्तेऽभयातास्सर्वेगणपादांबुजेपृथक्॥ ९५॥
ततः पूजांचक्रुस्तातेगणेभ्योभक्तिपूर्वकं॥ तानूचुर्विस्मयाविष्टाः कृतांजलिपुटाः सुराः॥ ९६॥ ॥देवाऊचुः॥ नमोनमः शंभवेभ्यो गण
णेभ्योवोनमोनमः॥ ९७॥ नमोगृत्सपतिभ्यश्चव्रातेभ्योवोनमोनमः॥ नमोव्रातपतिभ्यश्चविरूपेभ्योनमोनमः॥ नमोस्तुविश्वरूप
भ्योमहद्भ्योवोनमोनमः॥ रथिभ्योवोनमस्तुभ्यंरथेभ्यश्चनमोनमः॥ सेनाभ्यश्चनमोनित्यंसेनानिभ्यश्चवोनमः॥ क्षत्तृभ्योवोनमोनि
त्यंसंग्रहीतृभ्यएवच॥ ९८॥ इतिस्तुत्वापुनर्नत्वागणान्पुष्पकसंश्रितान्॥ कृतांजलिपुटास्सर्वेमध्येकंसमुपागताः॥ क्षमध्वमपराधान्नः
सर्वथाप्रयतान्सुरान्॥ पश्यध्वंकरुणादृष्ट्यापालनीयास्तथावयं॥ अयमज्ञोयमोनास्यापराधस्तथासति॥ क्षमाविधेयायुष्माभिर्यदि
दयांबुनिधयः सदा॥ ९९॥ इतास्तावदसंख्यातास्तेषांशिक्षापिदुर्लभा॥ मितानामेवसिक्षास्याद्मितानांतुसाकथं॥ यमस्यैकस्यग
मनंकथंप्रतिगृह्यगणाः॥ अपारग्रहसंकीर्णइदंब्रह्ममंडलंखलु॥ यद्विज्ञानात्स्वयंतत्वंतदापापोद्यतःकथं॥ अधुनातस्यशिक्षापि
मानीतस्यकृतास्खलु॥ यमोपिचित्रगुप्तेनसहसर्वेविचार्यतु॥ करोतिशिक्षांतद्योग्यांसापूज्यस्यनसर्वथा॥ १००॥ पूज्यापूज्यविचारो
पिक्रुतस्तेनभविष्यति॥ इदानींतुभवद्भिश्चत्वरयासमुपागतं॥ यमस्यबध्वानयनेयद्याघातपुरस्सरं॥ तदाकुत्रस्यास्माकंदुः
खितबुगणेश्वराः॥ शिवान्नोकारिपामत्रनयद्यप्यस्तिदुर्लभं॥ तथाप्यस्कविचारोत्रकिंकरोतीत्ययंयमः॥ १॥ भवदासांसमुल्लंघ्य
कोवाजीवितुमिच्छति॥ स्वर्गेपिसत्यलोकेपिवैकुंठेपिविशेषतः॥ अस्माकमपराधास्तुक्षमविष्यंतिसपोक्षणे॥ क्षंतव्योस्तिविशेषण

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६ श्री

नमोवीरगणनायक॥ कालकालाज्ञयासर्वंभवद्भिःक्रियतेयदि तदानिवारकःकोवासत्यंब्रह्मांडमंडले॥ किंचभृत्यान्विताःनःसा
पराधान्निशेषतः। पालयध्वंप्रयत्नेनभवत्पतिपरात्मके। अद्भुतमहदैश्वर्यंमहादेवस्यतस्यतु। दूतायंयमाननीयाध्वजाश्च्यान
सुरासुरैः। एकेनापिक्षणेनैववशीकर्तुंजगत्त्रयं। क्षणेनक्रियतेतत्रबहूनांकृत्यमस्तिकिं॥ शिवाज्ञमातुपरयोभवद्भिस्समुपागतं
श्रमोवन्नोहिभवतांलक्षःकोपस्यकिंयमः॥१॥ कैलासभुवनद्वारिस्थित्वापिस्मरणंयदि। शिक्षार्थंक्रियतेतर्हिशिक्षतःकिंनवैयमः
यमस्यतस्यकावार्ताविंशसर्वेगणाःसुराः। भवदाज्ञापाशबद्धाःतत्रकःसंशयोभवेत्॥ किंचाद्यभाग्यमस्माकंयूयंशंकरकिंकराः
नेत्रप्रसादपात्रत्वंप्राप्तंसद्भाग्यमेवनः। अद्यश्रीमद्गिरीशानपादुकादर्शनेकृते॥ भवद्दर्शनमात्रेणकृतार्थाश्चवयंगणाः॥ अस्माक
मपियद्भाग्यंलब्धेदेवफलंमुखं। यतोद्यभवतांदृष्टाःपुण्याश्चरणरेणवः। ब्रह्मांडमंडलस्यास्यपावनत्वंप्रकल्पितं। सधुनापाव राम: ७३
नान्नान्नाडुःखवार्त्तापिदूरतः। आशास्यमिदमस्माकंभवत्प्रसादावलोकनं। तज्ज्ञातमधुनानान्तकरवसंभावितंखलु॥१७॥ एवं
तेषुवदत्सुशंकरगणास्सर्वेषुबध्वायमंदेवानप्यनुकूलतामुपगतान्कालस्यसर्वानपि। बध्वातानपराधलेशरहिताञ्जेतुंतवैवो
द्यताः श्रीमत्स्कंजयशासनेनत्रामनंसंतास्यंतोमुहुः॥१८॥ ॥इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्येतृतीयांशेव्या
समुनिसंवादेनामषड्विंशोध्यायः॥२६॥ ॥श्रीव्यासउवाच॥ यमादिबंधनोद्योगकोलाहलमुमापतिः। श्रुत्वानंदिनमाहू
यप्राहयुक्तंवचस्तदा॥१॥ श्रीसदाशिवउवाच॥ त्वयागतंयमधुनासत्वंनंदिकेश्वर। रत्नपुष्पकमारुह्यविलंबस्त्वत्रनोचितः॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यमानुकूलतांप्राप्तास्संद्वीपेद्रामरुद्गणाः॥ तानानीयप्रयत्नेनशूलज्वालासुपातयन्॥३॥ यावंतःप्रतिकूलास्तेतसर्वेशूलघा
तनेः॥ तस्मात्सर्वेखलेबंधैश्चपीडनीयाःप्रयत्नतः॥ मदाज्ञोल्लंघनंकृत्वाप्रवृत्तायेदुरासदाः॥ तेपश्चाद्दृढबंधेनपीडनीयाःवि
शेषतः॥५॥ किंचतस्यपमस्यापितप्तकूपवधातने॥ यथापीडातथाकार्यंतत्रगत्वाप्रयत्नतः॥ तेषामानयनेनात्रनकृत्यम
पिदृश्यते॥ शिक्षातत्रैवकर्तव्यातसमुद्गरघातने॥ ७॥ कुंभीपाकेपातनीयाःप्रयत्नेनसुराअपि॥ यमानुकूलतांप्राप्तास्तेसर्वेदु
ष्टबुद्धयः॥ ८॥ किंचतेषांयातनायांतेषांचेन्मरणंतदा॥ सृष्टिरन्यैवकर्तव्यासर्वथापिमदाज्ञया॥ तवप्रतिभटोलोकेनकोपीत्यवधा
रितं अतस्तत्रयथाकामंसत्वरंयाहिसात्विक॥ १०॥ तत्रतावद्बहूच्चारोपिनकार्यस्तैस्सहाधुना॥ प्रतिकूलत्वमापन्ना हंतव्यास्ते(?)स
र्वथा॥ ११॥ यदितेसामवादार्थमायास्यंतिसुरास्तदा॥ तीक्ष्णातस्यक(?)घातैरविचार्यैवतान्हन॥ १२॥ इतितद्गिरमाकर्ण्यप्रणम्यापि
महेश्वरं॥ कृतांजलिपुटोनंदीप्राहवाक्यंविचक्षणः॥ नंदिकेश्वरउवाच॥ महेश्वराज्ञाशिरसाधृतानात्रास्तिसंशयः॥ त्वदा
ज्ञाभंजकोयस्यात्सहंतव्योनसंशयः॥ १४॥ ब्रह्मांडमंडलेकोवाधत्वदाज्ञाप्रतिकूलभाक्॥ सकंपाएवतिष्ठंतिसदासर्वेसुरासुराः
अपराधःकदाकोवाप्तविष्यतिनविग्रहे॥ इतितिष्ठंतिसर्वेपिसुराःत्रासनभीरवः॥ १६॥ किंवाधुनासुरास्सर्वेसहंतव्यास्त्वदाज्ञ
या॥ तावतानभवेत्तेषांनहानिरपिसर्वथा॥ १७॥ अन्यामराणांस्वर्गेतुभीतिस्तेषांकथंभवेत्॥ नूतनापेक्षयाजीर्णास्वतःशंकाकु
लकिताः॥ एतेषामेवकर्तव्याशिक्षातावद्यथोचितं॥ अनुतसास्तपस्तेपिस्थास्यत्याज्ञावशास्सदा॥ शिक्षायांक्रियमाणायांज

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पराधं पुनर्यदि। करिष्यंति तदा सर्वे हतप्राया एव ते सुराः॥२८ इति मे भाति भगवंस्त्वयि विज्ञापनामया॥ अज्ञात्वा कर्तुमेवेति निश्चितं
च मुहुर्मुहुः॥२९॥ व्यास उवाच॥ इति तद्वचनं श्रुत्वा विचार्य हृदि शंकरः। सम्यगुक्तं त्वया नंदिन् उचितं कुरु सत्वरं॥ इत्याज्ञप्तः प्रहृष्टः
पितरस्या नंदिकेश्वरः॥ जगाम पुष्पकारूढो यज्ञे देवा यमादयः॥२३॥ नंदिकेशं समालोक्य दूरात्ते शिवकिंकराः॥ सकंपं साडयामा
सुः कशाद्यैः रमरान्मुहुः॥ कृचित्त कशाघातैः मूर्छिताएव ते सुराः॥ मुद्गरैर्भिंदिपालैश्च ताडिताः प्रासवर्जिताः॥ तलप्रकचसंघ
तनिहताः पतिताः सुराः॥ चुक्रुशुश्च तदा सर्वाः सकंपाश्चमरांगनाः॥ ततो लाहलमाकर्ण्य गंधर्वा अपि चुक्रुशुः॥ तथैव मुनय
स्सिद्धा गंधर्वा अपि पन्नगाः॥ ततः परस्परं प्राचुः ते सर्वे भयविह्वलाः॥ दुरात्मना यमेनेदमविचार्य कृतं खलु॥ शिवाज्ञाविस्मया
तेन प्रमत्तेन दुरात्मना॥ न कृतेन पराधेन सुरास्सर्वे पि दुःखिताः॥३९॥ अकांडप्रलयारंभे कोयमस्मत्कुतो धुना॥ यतो बद्धा सुरास्सर्वे
पातिता धरणीमंडले॥ महाग्निज्वालया दग्धाः कशाघातैश्च पीडिताः॥ अयं निरंतराक्रोशः कदा शांतो भविष्यति॥ कदा वा नाशम
भ्येति सोयं घोर शत्रु दुर्दशा॥ एतावत्कृतमेतेस्मः गणैर्नंदी समेष्यति॥४२॥ स किं वा कर्तुमुद्युक्तः नला वृहास्य तेषिना॥ गणश्रेष्ठस्य
तस्यात्र किमशक्यं स सर्वो यैवान्॥ किं च संपत्समायातु महापद्व्विशेषतः॥ भोक्तव्यमागतं सर्वैरस्वतंत्रैस्सुरैरपि॥ ३४॥ एवं वदत्सु
सर्वेषु तत्र लोकनिवासिषु॥ तत्र नंदिनमालोक्य प्रणताः शिवकिंकराः॥ ३५॥ प्रणाम्य नंदिकेशं तं गणाः प्राचुर्नता ननाः॥ अस्माभि
कृत्यमेतावत् कृतं पश्य विशेषतः॥ यमानुकूलवचनैः एते बद्धाः सुराः परं॥ तत्पश्यं खलु यारवृद्धैः निहताश्चाग्निसंकुले॥ यमस्त्व

रामः
७४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पूर्वमेवात्र प्रबद्धः प्रहृतोपि च। एते तु मूर्छिताः सर्वे केशाघातप्रपीडिताः॥४४॥ अतः परं किमस्माभिः कर्तव्यं तदिदाधुना। त्वदाज्ञा
कारिणस्सर्वे वयं तावदसंशयं। ततस्सुरास्स्कं तं दृष्ट्वा नंदिकेशं गणोत्तमं। ततस्समुत्थितास्सर्वे नंदिकेशावलोकनात्॥४७॥ तत्करा
क्षामृतासिक्तास्ते सर्वे विगतज्वराः। विछिन्नबंधास्सर्वेपि प्रणतास्तत्पदांबुजे॥ पाहि पाहि ह्यपासिंधो सापराधान्पिक्षणं कटा
क्षकरुणासारैः अभिषिंचमुहुर्मुहुः॥ शिवाज्ञोल्लंघनं तावदस्माभिर्न कृतं प्रभो। तथापि दुरवस्थेयं निदानानामपीदृशं॥ शि
वपूजापरित्यागो न कृतः सर्वथा सुरैः॥ तथापि दुरवस्थेयं निदानानामपीदृशं॥ शिवध्यानपरित्यागः न कृतः सर्वथा सुरैः॥ तथा॥४५॥
शिवार्चकाराधनं च न सत्यक्तं सर्वथा सुरैः॥ तथा॥४६॥ उद्धूलनपरित्यागो न कृतः सर्वथा सुरैः॥ तथा॥४७॥ रुद्राक्षधारणत्यागो न
कृतः सर्वथा सुरैः॥ तथा॥४८॥ शिवपूजाद्रव्यनाशो न कृतो बुद्धिपूर्वकं। तथा॥४९॥ उपेक्षितं च नास्माभिरधुना शिवमंदिरं॥ त०
५०॥ शिवदूषणवार्तापि न श्रुता कापि सर्वथा॥ तथा॥५१॥ शिवाज्ञाल्लंघिता वापि सर्वथा न सुरैरिह॥ तथा॥५२॥ न शांकरगणा क्वा
सर्वथापि हता सुरैः॥ तथा॥ शिवाभिषेकपानीयं अपीत्वा न स्थितं सुरैः॥ तथा॥५४॥ न त्यक्तं शिवनैवेद्यभोजनं च सुरैरिह॥ तथा॥५५॥
न त्यक्ता शिवमधुना देवैर्निर्माल्यधारणं॥ तथा॥५६॥ शिवतीर्थाटनत्यागो न कृतः सर्वथा सुरैः॥ तथा॥५७॥ शिवनिंदकपापिष्ठपो
षणं न कृतं सुरैः॥ तथा॥५८॥ शिवमार्गमार्जनं च न कृतं सर्वथा सुरैः॥ तथा॥५९॥ शिवमार्गे कंटकानां न कृतं चालिवारणं॥ तथा॥६०॥
शिवालयामार्जनं चं कृतं सर्वथा सुरैः॥ तथापि॥६१॥ शिवालयापरिष्कारो न कृतः सर्वथा सुरैः॥ तथापि॥६२॥ दिवदीपापरिष्का
न

रोन कृतः सर्वथासुरेः ॥ तथापि ॥ ६२ ॥ शिवनीराजनादानेन कृतं सर्वथा सुरैः ॥ तथा ॥ शिवधूपानर्पणं च न कृतं सर्वथा सुरैः ॥ त
था ॥ शिवानिवेदितान्नानि न भुक्तानि सुरैः सदा ॥ तथा ॥ शिवानिवेदितं नीरं न पीतं सर्वथा सुरैः ॥ तथापि ॥ शिवानिवेदितं
वस्त्रं नोपभोगाय कल्पितं ॥ तथा ॥ शिवानिवेदितं सौरभ्यं नोपभोगाय कल्पितं ॥ तथापि ॥ रंभासंभोगकाले पि शिवविस्मर
णेन न ॥ तथापि दुःखस्थैर्यं त्रिदशानामभीदृशी ॥ ७० ॥ यथापराधमस्माकं विधेयमपि शासनं ॥ महेशानेन जानीमो महेशान
स्त्वमेव न ॥ आर्तोर्तिध्वांतहरणे करुणातरणिः क्षमः ॥ तस्माद्भवांस्त्वत्तस्माद्दीनोद्धरण हरप्रिय ॥ इति देववचः श्रुत्वा नंदिकेशः
कृपानिधिः ॥ तद्दुर्दशापहरणं चकार तदनंतरं ॥ ७२ ॥ ततः सिंहासनारूढो विमानादवतीर्य सः ॥ सुरेशाद्यैतेनंदी तानुवाच य
याचितं ॥ ७४ ॥ नंदिकेश्वर उवाच ॥ अपराधो समेनाद्य यः कृतस्तेन जीवनं ॥ असंभावितमेवेति विज्ञेयमधुना सुराः ॥ न कालमात्र
प्रलयो भवतामपि तद्ध्रुवात् ॥ संभाविता ध्रुवं रुयः सद्देवादेवमानवत् ॥ उग्रोपि तु परिवासीत प्रार्थना वचनैर्मम ॥ अन्यथा
सुरवर्गस्य जातस्याहि लयः खलु ॥ भवद्भिः सह या मैत्री मम यासांपरं सुराः ॥ भवतां रक्षणायासीदन्यथा तत्कथं भवेत् ॥ यमस्य
अपराधोत्र वस्तुतो नास्ति यद्यपि ॥ तथापि कृतदोषाणां यमेनाज्ञाप्य कल्पते ॥ न शिक्षयति कालोयं काले काले स्वकान्मुहुः ॥ कृत
नतः शिक्षयेति स वक्तुमिव शिक्षितः ॥ ८० ॥ इत्युक्तवंतं तं देवाः कालेनापि समन्विताः ॥ प्रणताः पुनरूचुस्ते विनयानतकंधराः ॥
देवा ऊचुः ॥ आनीतस्तावदधुना सतां क्लैव शिक्षितः ॥ न हतः पीडितो वापि विचारः क्रियतेधुना ॥ अविचार्य कथं कर्म कर्तव्यमधु राम: ७५

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नासुरे ॥ असर्वज्ञा स्वभावेन सर्वज्ञः केवलं शिवः ॥ विनाविचारं यद्यस्य पूजनं क्रियतेतरां ॥ जातस्यादपराधोपि नस्याद्धातक
विग्रहे ॥ ८७ ॥ किमस्य पुण्यं पापं वा प्रवृद्धं तद्विचार्यतु ॥ पश्चात्कार्यं यथायोग्यं कर्त्तव्यमिति निश्चयः ॥ यमाभ्यागमनेनायं
ज्ञायते पुण्यवानिति ॥ तत्सर्वं तत्कथं ज्ञेयं ज्ञायते नाधुनापितत् ॥ किमनेन कृतं पुण्यं भवदागमनक्षमं ॥ नदानैरपियोगैर्नो भव
दागमनं भवेत् ॥ तुला दानादिदानानि बहूनि कृतानि बहुभिर्मुहुः ॥ तेप्यागस्यात्र तिष्ठंति विचारः क्रियतेततः ॥ यागा अश्वमेधाद्याः
कृता येनैतेपि संततम् ॥ आगत्यात्र तु तिष्ठंति पश्चात्स्यात्तद्विचारणा ॥ अनेकयुगपर्यंतं येः कृतं तपसा तु तैः ॥ शरीरैस्ते समागत्य तिष्ठं
त्येतान्विलोकय ॥ एतेर्गोकोटिदानानि कृतानि बहुधा पुरा ॥ तिष्ठंत्यत्रैव ते सर्वे तानेतान्पश्य सत्वरं ॥ येर्भूप्रदक्षिणं पूर्वं कृतं ते
रथनाकुले ॥ स्थियते पश्य पश्यैतान् कोटिशोनं दिकेश्वर ॥ जायास्पत्य धुना धन्या धनदृष्टिपरायणाः ॥ दृष्टव्यास्तेत्वयास्वामि
न्नेतान्यप्यवलोकय ॥ अनेन प्रत्यहं लक्षं गवां दत्तं महात्मना ॥ अयं चस्थापितोस्यात्र तद्विचारो भविष्यति ॥ अनेन सस्य संपूर्णा
महीदत्ता मुहुर्मुहुः ॥ एतस्यागमने कालो भयानेवगतः खलु ॥ वनान्यनेन बहुधा सवनानि कृतान्यपि ॥ एतादृशाः कोटिशो
पितिष्ठंत्यत्र यमालये ॥ तटाकाः कारितास्तेन कोटिशः सागरोपमाः ॥ एतादृशाः कोटिशोपि तिष्ठंत्यत्र यमालये ॥ अत्युपरम
पितिष्ठंत्यत्र यमालये ॥ तटाकाः कारितास्तेन कोटिशः सागरोपमाः ॥ एतादृशाः कोटिशापि तिष्ठंत्यत्र यमालये ॥ अत्युपरम
हारण्यप्रपास्तेः कारिताः मुहुः ॥ महाग्रीष्मेपि तिष्ठंतिपश्यैतान्यममंदिरे ॥ अनेन मेरुतुल्यानि दत्तानि वसनान्यपि ॥ दरिद्रेभ्योवि
शेषेण पश्यतेयममंदिरे ॥ ९० ॥ गोक्षीरकुंभाः शतशो दत्तास्तेन प्रयत्नतः ॥ प्रत्यहं विप्रवर्गेभ्यः पश्य पश्य यमालये ॥ अन्नप्रदाने

अनेन प्रत्यहं लक्षं स्नानामेव दीयते ॥ ब्राह्मणेभ्यः प्रयत्नेन तिष्ठत्यत्रावलोकय ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेतेन कोटिशस्तो पितादृजाः। एतादृशा मुक्तः पश्यकोटिशो यममंदिरे॥३॥ कन्यादानैर्विनीतस्ते कालः कनकसंयुतैः। एतादृशाः
कोटिशो विसतिपश्यय मालये॥४॥ आवृत्तानि मुक्तैस्तस्त महादानानि कोटिशः। नेतषां गणना च्यलिसर्वथा यममंदिरे॥४॥ गोकोटि
पानयोग्यानि कुलान्यपि कृतानि तैः। पश्यतान्नं दैके साद्य यममंदिरसंस्थितान्॥५॥ रत्नधासादृदानानि तैः कृतान्येव कोटिशः। तेषानगपा
नाद्यापि पश्य पश्यय मालये॥६॥ कृतानि तैः कोटिशोपि सरांसि विपुलान्यपि। वाप्यः कृताश्च संपूर्णाः जलैः पश्यय मांतिके॥७॥ पर्यंकशा
य्यादानानि कोटिशस्तैः कृतान्यपि। पश्यतान्पतितान्दूरे छत्रदानपरानपि॥८॥ धनैर्धान्यैश्च गोरेहैः गृहोपकरणोस्सह। गृहास्तु को
टिशो दत्ताः तैस्तानत्र विलोकय॥९॥ पाथः छायानुकूलाश्च वृक्षास्तैः कोटिशः कृताः। पंथिभ्यो जलमन्नं च दत्तं तैस्तान्विलोकय॥१०॥
सुगंधपुष्पमालाभिः दिव्यचंदनकर्दमैः। कोटिशस्तोपि ता विप्राः तैः सानत्र विलोकय। अतः परं कदातेषां विचारो विभविष्यति। तेषां विनि
र्गमो वासा तेषां तु गणनापि न॥१२॥ परार्धो वधितेष्वि ति तेषां किं गणनाधुना। तावतां गणना तावत्कस्तां ते भाविवानचा। एकैकस्य विचा रामः
रे पापुण्यपापानुयोगतः। कालापनयनं तावत्कोटिस्यास्यं प्रजायते। जरुपालाश्च मध्य स्यनावकाशं प्रजायते। कालं नयति कालोयं धर्मा ७६
धर्मविचारयोः॥१५॥ एतादृशास्य कालस्य शासनार्थं किमुद्यमः। शुकाम वर्तियनास्य ताउन्नीकृतमीदृशं। शिवलिंगार्चनं त्यक्तं किमनेनाधु ८० नं
नाप्ययं। शासनार्हः कथं चायं शंकरस्येश्वरः खलु। पश्यनिपुं तत्कालेकंठरुद्राक्षमालिकं। एतस्य ताडने भीतिः शंकरास्त्वनान्विते
शिवलिंगार्चकानस्मान् भूतिरुद्राक्षभूषणान्। पश्यन्नपानि चास्माकं अंगे घाघातजान्यपि। अस्माकं दुरदृष्टानि किमद्यापि गणेश्वराः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भूतिरुद्राक्षदेहानां दुःखमेतत्कथं मतं ॥ इत्युक्त्वा विरतो देवाः प्रणिपत्य पुनः पुनः ॥ तृषापीडितसर्वांगाः तदाघातभयातुराः ॥१२१॥
यस्यैश्वर्यमपारमस्त्रुतमघानाक्रांतमंतं विनातिष्ठत्यप्रतिमं तमेव तरणं मन्ये कृपासागरं ॥ गौरीचारुपयोधराधरवलीहारावलीके
लिकालीलोलोलमिहानुवेलमकलं श्रीकालकालं भजे ॥१२२॥ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे
व्यासमुनिसंवादे नाम सप्तविंशोध्यायः ॥२७॥ ॥ व्यास उवाच ॥ इतीदं वचः श्रुत्वा नंदिकेशः शिवं स्मरन् ॥ शिवप्रभावं संस्मार
विलक्षणामनामयं ॥१॥ नंदिकेश्वरः ॥ शृणु विष्णो शृणु ब्रह्मन् शृणु कालशचीपते ॥ शृण्वंत्वन्ये सुरगणाः प्रभावं शांभवं मुदा ॥२॥ महे
श्वरः सर्वसुरान्नमोयमनामयो यं जगदीश्वरो यं ॥ मृत्युंजयोयमहनांतकोयं कालांतकोयं मम भागधेयं ॥३॥ अस्माकमाराध्यतमप्रभुः शिवे
श्वेश्वरश्रीचरणारविंदं ॥ आनंदकंदं तदिदं प्रमोदं ददातु मंदस्मृतमप्यमंदं ॥४॥ इदं मुकुंदैर्व्रतसावधानैर्मंसोमावतंसं गिरिजावतंसं न
मेव वेदांतगुपास्तवंति नंदेवदेवं शरणं प्रपद्ये ॥५॥ यदाकदाचिद्धृदयारविंदे महेश्वरश्रीचरणारविंदं ॥ क्षणं चरेता यदि चिंतयंति तदा भूत
तस्य पदं नयाति ॥६॥ यः कालकालः श्रुतिषु प्रसिद्धः तं कालकालं प्रणमामि संतः ॥ तेतावदंते नकृतांतभीतिं प्रयांति ये सेवशिवं प्रसन्नं
७ ॥ न चायमन्यामरतुल्यरूपो यतो विरूपाक्ष इति प्रसिद्धः ॥ कोवा विरूपाक्षसमः क्षमेत विनाविरूपाक्षकटाक्षलेशं ॥८॥ धर्मैरपारैरल
मेव यागैः दानैरपारैरलमेव योगैः ॥ तपोभिरुग्रैरलमेव किं तैस्तं कालकालं कलयन्नुवेलं ॥९॥ एकं नवं बिल्वदलं शिवाय समर्पितं तत्
तुलनां प्रयाति ॥ धर्मोपि कोवा तदुमासहायस्वरूपदानेपि समर्थमेव ॥१०॥ खंजानि पत्राण्यपि चंद्रमौलेः छिन्नानि पुण्यान्यपि ...

स्यावा ॥ क्षिप्तानि गृह्णाति शुभं ददाति मुक्तिं ददाति प्रतिभः स धर्मो ॥ किमश्वमेधाधिक यागवृंदैः नैते शिवाराधनपुण्यराशेः ॥
लेशोस्ति यः सूक्ष्मतरो नितांतं तेनापि तुल्या न भवंति तेतु ॥ १३ ॥ गोकोटिदानैरपि किं फलं स्यान्नैते शिवाराधनपुण्यराशेः ॥ लेशोस्ति यः सू
क्ष्मतरो नितांतं तेनापि तुल्या न भवंति तेतु ॥ १४ ॥ किमुत्तमाश्वार्बुददानसंघैर्नैते शिवाराधनपुण्यराशेः ॥ लेशोस्ति० ॥ १५ ॥ किं कांचनाभ्यंचित
कन्यकानां दानैरपारैरथवा सरं वा ॥ ति लिंगपूजाफललेशलेशलेशेन साकं तुलनां प्रयांति ॥ १५ ॥ सस्यादिसंपूर्णमहीप्रदानैः किं तैरनंतै
रपि तानि तानि ॥ ति लिंगपूजाफललेशलेशलेशेन साकं तुलनां प्रयांति ॥ १६ ॥ वनानि सांद्राणि चिनिर्मितानि किं तान्यनंतान्यपि संततानि
ति लिंगप० ॥ १७ ॥ किमन्नदानैरमितैर्विचित्रैर्घृतादिकं द्रव्यसमन्वितैर्वा ॥ ति लिंग० ॥ १८ ॥ गोक्षीरपूर्णामितकुंभदानैः धनप्रदानैर्थ्य फलप्रदा
नैः ॥ ति लिंगपू० ॥ १९ ॥ विचित्रवस्त्राभरणार्बुदानां दानैरपारैरुदककुंभदानैः ॥ ति लिंगपूजा० ॥ २० ॥ सुगंधपुष्पामलमालिकानां दानैरपारैर रामः ७८
पि किं फलं स्यात् ॥ ति लिंग० ॥ २१ ॥ लिंगे प्रदत्तं कुसुमं दलं वा फलं जलं वा तदुमासहायः ॥ गृह्णाति तेनैव ददाति भाग्यं प्रदत्तं तमंते स ददाति
मुक्तिं ॥ २२ ॥ दूर्वांकुरैर्वा शिवलिंगरूपं संपूज्य भक्त्या प्रणमंति ये ते ॥ तीर्त्वैव संसारमहांबुधिं तं प्रयांति संतः खलु कालकाले ॥ २३ ॥ लिंगे प्रदत्तं ज
लमंबु वान्यद्दत्तं तदेवामितपुण्यहेतुः ॥ नैतेन तुल्यं जगतीतलेस्मिन् शुभावहं पापविनाशहेतुः ॥ २४ ॥ शिवाय यः प्रत्यहमादरेण दद्याज्जलं
बिल्वदलानि दद्यात् ॥ तत्पुण्यतुल्यं तु न पुण्यमस्ति दृष्टं श्रुतं वा भुवि सुप्रसिद्धं ॥ २५ ॥ शिवाय दद्याद्यदि मुष्टिमात्रं भक्त्या य एकं घृततैलशालु
कं ॥ तत्पुण्यतुल्यं० ॥ दीपं महेशाय घृताभिषिक्तं सद्वर्तिकायुक्तमपि प्रदद्यात् ॥ तत्पुण्य० ॥ धूपं महेशाय घृतेन सिक्तं ददाति यः प्रत्यहमाद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रेण॥ तत्पुण्य०॥ दधिप्रदानं गिरिजाय भक्त्या करोति यः प्रत्यहमादरेण॥ तत्पुण्य०॥३१॥ सिताप्रदानं गिरिजाय भक्त्या करोति यः प्र
त्यहमादरेण॥ तत्पुण्य०॥३२॥ मधुप्रदानानि भवाय भक्त्या करोति यः प्रत्यहमादरेण॥ तत्पुण्य०॥३३॥ फलप्रदानानि मृडाय भक्त्या करो
ति यः प्रत्यहमादरेण॥३४॥ तांबूलदानं गिरिजाय भक्त्या करोति यः प्रत्यहमादरेण॥ तत्पुण्य०॥३५॥ एलालवंगादिकमादरेण ददाति यः प्रत्यह
मीश्वराय॥ तत्पुण्य०॥३६॥ ददाति यो दर्पणमीश्वराय मनोहरं प्रत्यहमादरेण॥ तत्पुण्य०॥३७॥ करोति यश्चामरवीजनेन वातप्रसारं गिरिजा
य नित्यं॥ तत्पुण्य०॥३८॥ छत्रप्रदानं नियमेन नित्यं करोति यः सर्वसुरोत्तमाय॥ तत्पुण्य०॥३९॥ ध्वजप्रदानं गिरिजाय नित्यं करोति यः प्रत्यहमा
दरेण॥ तत्पुण्य०॥४०॥ नाट्यप्रदानं गिरिजाय नित्यं करोति यः प्रत्यहमादरेण॥ तत्पुण्य०॥४१॥ तूर्यप्रदानं गिरिजाय नित्यं करोति यः प्रत्यहमा
दरेण॥ तत्पुण्य०॥४२॥ संमार्जनं शंकरमंदिरस्य करोति यः प्रत्यहमादरेण॥ तत्पुण्य०॥४३॥ दीपावलीं शंकरमंदिरेषु करोति यः प्रत्यहमादरेण
तत्पुण्य०॥४४॥ दुकूलदानं गिरिजाय भक्त्या करोति यः प्रत्यहमादरेण॥ तत्पुण्य०॥४५॥ करोति यः पुष्पवितानदानं भक्त्या महेशाय विशेष
काले॥ तत्पुण्य०॥४६॥ वसंतकाले नवचंदनेन करोति लिंगे घनुलेपनानि॥ तत्पुण्य०॥४७॥ दध्यन्नदानेन करोति पूजां नित्यं महेशाय तु सो
पदंशं॥ तत्पुण्य०॥४८॥ क्षीरान्नदानेन करोति पूजां नित्यं महेशाय तु सोपदंशं॥ तत्पुण्य०॥४९॥ घृतान्नदानेन करोति पूजां नित्यं महेशाय तु सो
पदंशं॥ तत्पुण्य०॥५०॥ मध्वन्नदानेन करोति पूजां नित्यं महेशाय तु सोपदंशं॥ तत्पुण्य०॥५१॥ महेशनैवेद्यविशेषदानैर्यः शंकरं तोषयति
प्रयत्नात्॥ तत्पुण्य०॥५२॥ महेशदत्तैर्वसनैर्धनैर्वा यः शंकरं तोषयति प्रयत्नात्॥ तत्पुण्यतुल्यं तु न पुण्यमस्ति दृष्टं श्रुतं वा श्रुतिषु प्रसि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वे॥५३॥ त्वं हि लिंगार्चनेन पुण्यं तुल्यमनघं पुण्यं श्रुतं न तद्यतः पुण्यानामपि पुण्यमुत्तममतं तत्सर्वपुण्यालयं॥ तन्मृत्युंजयतोषकारण
मितिज्ञातं तदेवोत्तमं तद्धृदांतशिरोमणिः श्रुतिमतः किं तेन तुल्यं सुराः॥५४॥ ये ये सुराः सुरपदांबुजपूजनेन तुल्यं न पुण्यमतुलं न तद
पारपुण्ये॥ साध्यं तदेव सुकरं करवीरपुष्पैर्दूर्वांकुरैरपि कृतं विलनेति मुक्तिः॥५५॥ विश्वास्तः शिवपूजने यगणितैः पुष्पैः परं ज्ञायते नात
स्याप्यनुवर्त्तनं बहुतरैः पुण्यादिभिर्जायते॥ तस्माज्ञाकरवान पुण्यनिचयः प्राप्ताः समस्तास्तदा कल्याणांबुधयो ह्यपारविभवाः प्राप्ताः प
रार्द्धाधिकाः॥५६॥ कामं काम्यविहीनोऽप्याप्यमुनिभिस्तत्तत्ततः किं ततो लिंगाराधनमंतरेण मरणे भामस्य मुक्तेरपि॥ नान्योनेत्यवधारियं श्रु
तिगणैः लिंगार्चनं कामदं सर्वेषामिति निश्चितं तदितरत्सर्वं तु मान्वेषणं॥५७॥ एकं बिल्वदलं नवं शठितमप्याम्लानमप्यस्य मस्यैष्य
त्संन्शिवलिंगभागनिहितं हंसापदं भोनिधीन॥ कल्याणांबुधिवंति मध्यनुदिनं तावत्करोस्यत्वहं मोदांभोधिविवर्धनेन च न हृष्यामुक्तिं ॥ राम: ॥
तनोस्तु ततः॥ सत्यं सत्यमिहोच्यते सुरगणाः सत्यं पुनः सत्यथा युष्माकं भुजहंसशापथमप्येवापदांभोरुहे॥ कृत्वा शंकरचारुचार ॥७८॥
चरणांभोजेपि लिंगार्चनं सर्वाभीष्टदमेव तेन सदृशं पुण्यं न लोकत्रये॥५९॥ एतल्लिंगसमर्चनं मुनिजनाशास्य रहस्यं परं वक्तव्यं शिव
पूजनोत्सवरसाविर्भावनुष्णायतां इच्छायामितपुण्यकीर्तिविभवाकारायहारायतन्नान्यस्मै शिवनिंदकायसपथः शंभोः प्रभोः पाद
योः॥६०॥ व्यास उवाच॥ नंदीश्वरवचोवीचीपानपीनात्मविग्रहाः॥ शिवानुग्रहमासाद्य प्रापुरानंदमद्भुतं॥६१॥ ततः परमनेनापि स्तुतानी
तेन किं पुरा॥ पुण्यं कृतं वदास्माभिः न ह्यंतमितिचोचिरे॥६२॥ नंदिकेश्वरः॥ किं वक्तव्यं मयादेवाञ्जिनेजस्याद्भुतं खलु। चौरेत्रेत

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्पवित्रं हि पवित्राणां विशेषतः॥ हरस्यामरवीरस्यारके स्वप्यविशंकया॥ अनुग्रहस्तदोग्राणां परमानंदसाधनं॥ स्वतंत्रः समहादे
वाय यश्यतिदयार्णवः॥ तेनतीर्णः संसारः पापनक्रः करः खलु ॥६६॥ अनुचितानुसारेण किंकराणांतुवर्तनं॥ अन्यथाविपरीतं स्यादिति स्या
निश्चितमवहि ॥६७॥ तद्युक्तिरेववेदार्थो वेदवक्तासरवहि॥ प्रामाण्यमपिवेदानांनस्वतः परमार्थतः॥ परंतुशिववाक्यत्वस्वरूपेणातिनिश्चि
तं ॥ वेदास्तुशिववाक्यानिप्रामाण्यंतेषुसर्वथा॥ ६८॥ धर्मतत्वंमहेशेनज्ञायतेनामरेरपि॥ किंनरैर्वानगंधर्वैर्नराणांतत्रकातथा॥ ६९॥ नित्यस
र्वज्ञमूर्तित्वादष्टमूर्तिः परस्वतः जानातितत्वंधर्माणांसर्वेषामपिवस्तुतः॥ ७०॥ अयमेतादृशो धर्मः फलमस्येदमित्यपि॥ जानातिभगवान्
शंभुः सांबः संसारमोचकः॥ तन्मायया परं विश्वंमोहितंतच्चराचरं॥ संसारपातयत्येवपुनः पुनरनेकधा ॥७१॥ अहोमहेश्वरैश्वर्यमपार
मतुलं खलु॥ तत्वंनज्ञायतेलोके वेदैर्नज्ञायतेयतः॥ तदुक्तंवचनैर्वेदैः तद्रूपावगमः कथं॥ अस्मदुक्तेनवाक्येननास्मज्ज्ञानंयथातथा॥ ७२॥
वेदांतागोचरंरूपंसच्चिदानंदलक्षणं॥ तदस्माभिः कथंज्ञेयं दुर्ज्ञेयत्वावधारणात्॥ यल्लीलाविग्रहाः शंभोः तेषनंतास्तथाविधाः त
ज्ञानमयशक्तंहि सर्वथैवस्वभावतः॥ ७३॥ एकैकोविग्रहस्तस्यनास्मल्लयलगोचरः॥ तेजः पुंजसमाक्रांतास्तेजः पुंजास्वभावतः॥ ७४॥
द्विबाहवोविग्रहास्तु कोटिशः परमात्मनः॥ तस्यैवकोटिशस्तावततेचतुर्बाहवः पराः॥ किंचिदष्टभुजास्तस्यकेचिच्चदशबाहवः॥ सहस्र
बाहवः केचित्केचिदर्बुदबाहवः॥ पराईबाहवः केचिन्महादेवस्यविग्रहः॥ दिव्याभरणसंपन्नास्तेसर्वेमेरुसंनिभाः॥ दुकूलसंवृताः
स्सर्वेदिव्यचंदनचर्चिताः॥ उमार्धविग्रहास्सर्वे त्रिशूलवरबाहवः॥ तेसर्वेचंद्ररेखांता नीलकंठाः कपर्दिनः॥ कैलासभुवनागारस्था

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सर्वेप्यवस्थिताः॥ परमानंदसंपूर्णास्ते सर्वे विकृपार्णवाः॥८३॥ तत्प्रमाणार्णवांतस्के नैवैदैरपि दृश्यते॥ तद्ध्यानमस्मदादीनां सुतरा
मपि दुर्लभं॥ एतेषां विग्रहाणां तु सर्वेषां मूलविग्रहः॥ विद्धिनः शिवरत्वेति तद्ध्यानमतिदुर्लभं॥ तच्चाद्विवाडुरीशानविग्रहाद्दृश्यते
मया॥ कथंचिद्घोरतपसा कृपयापि शिवस्य मे॥८२॥ शिवयोस्य यदा पुत्रः तद्वातद्दर्शनं परं॥ कुमारस्य गणेशस्य सद्दन्येषां तु दुर्लभं॥
८७॥ स विहारार्थमायाति यदा बहिरुमां विना॥ तदा सकरुणापूर्णा हि लोचनगोचरः॥ तस्यैव लीलया सृष्टिस्थितिसंहार इत्यपि॥ स कथं
विहृदसर्वैः विरूपाक्षो निरूपितः॥ तदाहात्म्यं सर्वं इदं ब्रह्मांडमंडलं॥ वातिवातस्ततो भीतः शंकराद्भुयशासनात्॥ उदेत्यर्थासनादे शा ७७८
व भीतः सूर्यो प्युदेत्ययं॥ भीषास्मादग्निरिंद्रश्च मृत्युर्धावति पंचमः॥ एतादृशं महादेवं सर्वं श्रुत्यंतसंस्कृतं॥ स्मृत्वापि मुच्यते घोरैः रपारे
स्कं ७१ रध्यसागरैः॥ अर्चनं स्मरणं ध्यानं वंदनं कीर्तनं तथा॥ नुयोपि शिवलिंगाय शिवस्यानंतमुच्यते॥ शिवचरणसरोजाभ्यर्चनध्यानदानस्म रामः ७९
रणभजनगानाशधनालापनाद्यैः॥ अनुपदमनुयांतं साद्दरादिहिशाः कनकरुचिरदंडारवंडतुंडातपत्रैः॥ २४॥ ॥ इति श्रीस्कां
दे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे व्यासमुनिसंवादे नामाष्टाविंशोध्यायः॥ २८॥ ॥ श्रीव्यास उवाच॥ ततः परं सुरा
स्सर्वे प्रणताः प्रीतिपूर्वकं॥ शिवधर्मार्कणेनार्थमुद्यताः प्रीतिपूर्वकं॥ १॥ ततः कृतांजलिपुटाः सुरास्तेनतकं धराः॥ शिवधर्मान्वर
स्वेतितं मुहुर्मुहुरानना॥ २॥ सुराणां गिरमाकर्ण्य स धीरो नंदिकेश्वरः॥ शिवधर्मान् विस्तरेणाभपणः माहतान् सुरान्॥ ३॥ नंदिकेश्व
र उवाच॥ नानाधर्मफलापारस्सः शंकरपूजनं॥ न तस्मादधिकं पुण्यं श्रुतं स्वर्गापवर्गदं॥ शिवपूजनमेवैतद्दुग्धा श्रुतिकीर्तितं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्कीर्त्तनेनवेदाश्च पावनाइति कीर्तिताः॥ शिवध्यानंपरापूजाशंकरस्यमहात्मनः॥ तेनध्यानेनमुच्यंतेसंसारादघसागरात्॥ हिर
ण्यबाहुरित्यादिश्रुतिकोटिप्रतिश्रुतं॥ स्वरूपंशंकरस्येदंध्येयमोहविनाशकृत्॥ मुहुर्मुहुरमाक्रांतमितांतंशांतविग्रहं॥ ध्यात्वा
ध्यानप्रभावेणमुच्यतेभवबंधनात्॥ बहुजन्मार्जितैःपुण्यैःशिवेभक्तिःप्रजायते॥ तयाभक्त्यामहादेवंध्यात्वामुक्तोभवेन्नरः
साभक्तिर्दुर्लभालोकेतपसाध्यपरास्तत॥ शंकरानुग्रहादेवसाभक्तिर्भवतिध्रुवं॥१०॥ भुक्त्वाकेनप्रकारेणध्यात्वालिंगसदाशिवं
पूजाकार्याप्रयत्नेनप्रत्यहंप्रीतिपूर्वकं॥ बिल्वैःप्रसूनैर्द्दिव्यैर्वानवदूर्वांकुरैरपि॥ नैवेद्यैःपूजयेल्लिंगंसर्वमंगलदायकं॥११॥ भस्मना
द्धूल्यसर्वांगंकृत्वारुद्राक्षधारणं॥ शिवलिंगमुपस्पृश्यचरवाचरमेववा॥१३॥ सद्योजातादिभिर्मंत्रैःआवाह्यगिरिजापतिं॥ रुद्राध्या
येनसूक्तैश्चरौद्रैरीशाभिषेचनं॥ गोक्षीरदधिमध्वाज्यैःशर्करफलसंयुतैः॥ जलैश्चशीतलैर्धाराभिर्विच्छिन्नांप्रकल्पयेत्॥१५॥ ततोवि
भूतिंदत्वातुदद्याच्चंदनमादरात्॥ ततोबिल्वदलंदद्यादक्षतानपिसादरं॥१६॥ ततोधूपंचदीपंचनैवेद्यंचमनोहरं॥ पानीयंचाथ
तांबूलमेलाकर्पूरसंयुतं॥ लवंगादियुतंदद्यात्दुकूलंचततःपरं॥ पश्चादारमरयंदद्यात्दीपनीराजनंततः॥ दर्पणंचामरंछत्रं
व्यजनंचततःपरं॥ दत्वाप्रणम्यबहुधानाद्यमीशायकल्पयेत्॥ पुनर्जलंगंधयुक्तंशीतलंचमनोहरं॥ दत्वाधूपंचदीपंचकर्पूरे
णमनोहरं॥ पश्चाद्गुरूपदिष्टेनमार्गेणातिस्थिरासनः॥ पंचाक्षरंजपंकृत्वाशंकरान्भोजयेत्ततः॥२१॥ स्वयंचशिवनैवेद्यंभुक्त्वा
मौनपुरस्सरं॥ ततःशिवकथांपुण्यांवाचयित्वापुनःशिवं॥ पुनराराधनंकुर्यादुक्तमार्गेणसादरं॥ एवंकृत्वापुनःपूजांमध्यरात्रेपुनः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुनः पुनः ॥२७॥ ततः शायनसामग्रीं संकल्प्य शिवयोः स्वयं ॥ कृत्वा शायनमीशानं स्मृत्वा तथा यार्चयेत्पुनः ॥ एवमामरणं कुर्यात्त
दीपनयनोत्तरं ॥ इदं निसंभ्रास्य यानां राज्ञां वैश्यस्य चामतः ॥ सुराणां च विशेषेण मुनीनामथ तु सत्तमः ॥ शिवार्चनं परो धर्मो किं नरा
णां विशेषतः ॥ मधर्वाणां च सर्पाणां सिद्धानां च विशेषतः ॥ नारीणां च परो धर्मः शिवपूजनमास्तिकाः ॥२८॥ शूद्राणामितरेषां च लोकि
के शिवपूजनं ॥ शिवार्चनं विना भुक्त्वा दरिद्रो भवते ध्रुवं ॥ अंते नरकमाप्नोति शिवार्चनविवर्जितः ॥ संसारबंधनान्मुक्तो न भवत्येव स
र्वथा ॥२९॥ संसारसागरे मग्नः शिवपूजनलक्षणं ॥ आधारं दुर्लभं प्राप्य समुत्तिष्ठति मानवः ॥३०॥ संसारबंधविच्छेदं शिवार्चनमहा
सिक्तिः ॥ तद्विच्छेदकमन्यत्तु दृश्यते न जगत्त्रये ॥ जायंते बहवस्तावन्म्रियंते च पुनः पुनः ॥ शिवार्चनविहीनास्ते जन्मकोटिषु दुःखिताः ॥
तेगर्भे नरकावासाः ये शिवानर्चका नराः ॥ सद्रूपाणां च तेषां च विशेषस्कं न सर्वथा ॥ मत्ताशानं यतस्तेषां तेषामथ विशेषतः ॥ तेपि रामः
वो [illegible] सूकरगर्भेषु जायंते च पुनः पुनः ॥ अत्रोदाहरंतीममितिहासं पुरातनं ॥ अपारवेदशास्त्रस्थं वेदवेदांतपारगः ॥ पुराकस्मिन्नभूद्वि ८०
प्रो धनधान्यसमन्वितः ॥ पूर्वार्जितेन पुण्येन पुत्रपौत्रादिसंयुतः ॥ स भुंक्ते विपुलान्भोगान् शिवानर्चनतत्परः ॥ असंख्यातैः महा
संतनाद्यगानादरस्सदा ॥ ददाति तेभ्यो वित्तानि बहूनि विविधान्यपि ॥ रत्नानि तेन दत्तानि दुकूलान्यपि कोटिशः ॥ अशां करैः स
हप्रीतिः तेभ्यो दत्तं मुहुर्मुहुः ॥ गावः सहस्रशो दत्ताः तेभ्य एव सयत्नतः ॥ अशांभवे स्सहावासैः सल्लापभोजनशयः [?] ॥ अशांभ
वं मंदिरं च तस्याभाति स्मशानवत् ॥ ततस्य मंदिरे शैवः शिवलिंगं मनोहरं ॥ तस्य डालं स्मशानेन तुल्यमित्यवगम्यतां ॥ यत्र शां

११ मद्दिपीणां सहस्राणि तेभ्यो दत्तानि कोटिशः ॥ अश्वाश्च दत्तास्तेनैव बलीवर्दाश्च कोटिशः ॥ अन्नागारा नृपो दत्ता स्तेभ्य एव प्रयत्नतः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर संकीर्णं यल्लिंगेन विवर्जितं ॥ शिवलिंगविहीनस्य मंदिरे यदि मोहतः ॥ निवसेत्सोपि चंडालः शतजन्मनि जायते ॥ अज्ञो भवे
दकं पीत्वा मज्जनाय भयत्नतः ॥ मत्कुंडे तपत्येव जन्मकोटिषु मानवः ॥ अज्ञो भवान्नमोहेन यो भुंक्ते मोहितो पि वा ॥ संततं मलकुंडेषु
तपत्येव न संशयः ॥ अज्ञो भवेस्सह प्रीतिः भोजनाद्यैः करोति यः ॥ सचंडालत्वमासाद्य विष्ठायां जायते कृमिः ॥ महापातकिसंस
र्गो विलंस्वर्गविनाशकः ॥ अज्ञाकैरैः सहावासान्नरकं दुःखसाधनं ॥ चंडालैरपि संवासः यद्यापदि तदापरं ॥ सतां वस्स्वर्गमार्गस्य सर्वथा
न निवारकः ॥ भोगः स्वर्गापवर्गाणां मज्ञो भवकुलान्वय ॥ दुरक धापस्य तात्र परत्रापि महद्भयं ॥ ५० ॥ सताद्दशो मृतो दैवात्सकलत्रो शि
मावसः ॥ तेन भुक्तानि घोराणि नरकानि पुनः पुनः ॥ यैर्यैस्तस्य धनं प्राप्तं तस्य मित्राणि यानि च ॥ तैः सहात्यंतघोरेषु नरकेषु स्थितः स
तु ॥ संसारमेय जन्मानि भुक्त्वा भुक्त्वा सहस्रशः ॥ पिशाचरूपतां प्राप्तो वने जलविवर्जिते ॥ तत्रार्त्तः धंसे मासो पि सुधार्त्तो घनुवा
सरं ॥ दुःखेन कालं नयनं कृतं तेन दुरात्मना ॥ एतादृशाः कोटिशस्क विपिनं समुपाश्रिताः ॥ तृषान्तश्चिव सुधार्त्तश्च दग्धाश्च जठरा
ग्निना ॥ ५१ ॥ तदाकोशैर्वनं व्याप्तं मृगैर्गी तैस्सहस्रधा ॥ तैः शब्दैः कर्णशास्त्राभैर्वनं त्यक्तमनंतधा ॥ तस्मिन्वने मनोज्ञानि फलानि वि
पुलान्यपि ॥ तेनैदृष्टानि रम्याणि जलान्यपि विशेषतः ॥ तेनैदीयः शंकराय दत्तः शंकरमंदिरे ॥ तेन पापेन ते सर्वे पंथाः सर्वात्मनासु
राः ॥ येन दीपो महेशाय न दत्तो भक्तिपूर्वकं ॥ ते तु सर्वेपि जात्यंधाः भवंत्येव न संशयः ॥ येनैदत्तं महेशाय शीतलं जलमुत्तमं ॥ ते नृषार्त्ता
न पश्यंति जलं च निकटस्थितं ॥ ६० ॥ येनैर्दत्तं महेशाय चंदनं च मनोहरं ॥ ते दुर्गंधसमाक्रांत तनवो पि भवंति हि ॥ येनैर्दत्तं महेशाय वस

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नैश्रीतिपूर्वकं। ततुनप्राप्नुवंत्येववसनानिविशेषतः। यैर्नदत्तंमहेशायनैवेद्यंरससंयुतं। ततुनप्राप्नुवंत्यन्नंनपश्यंत्यपिदूरतः। ये
मंदिरंमहेशायनकृतंभक्तिपूर्वकं। ततुनप्राप्नुवंत्येवसदनंसर्वथासुराः। रुचिराणिमनोज्ञानिविचित्राणिफलानिच। जलानिवाम
हेशायदत्वाकामानवाप्नुयात्। जलंचुलुकपूर्णंवायोदद्यात्द्विजायसः। कुबेरपिजलंप्राप्नोसतियोमेण्यसंशयः। जलंदत्वामहे
शायतद्दत्वाशंभवायच। सुधासागरमासाद्यमोदतेमनुजस्सुराः। अन्नंदत्वामहेशायतद्दत्वाशंभवायच। अन्नपर्वतमासाद्यमोदं
तेमनुजाःसुराः। दुग्धंदत्वामहेशायतद्दत्वाशंभवायच। क्षीरसागरमासाद्यमोदतेमनुजाःसुराः। दधिदत्वामहेशायतद्दत्वाशंभवा
यचा। दधिसागरमासाद्यमोदतेमनुजास्सुराः। ७०। घृतंदत्वामहेशायतद्दत्वाशंभवायच। घृतसागरमासाद्यमोदतेमनुजाःसुराः
शिवायशर्करान्दत्वातद्दत्वाशंकरायचा। शर्करागिरिमासाद्यमोदतेमनुजःसुराः। फलंदत्वामहेशायतद्दत्वाशंभवायचा। फल
पर्वतमासाद्यमोदतेमनुजःसुराः। शिवायचंदनंदत्वातद्दत्वाशंभवायच। चंदनाद्रिमासाद्यमोदतेमनुजःसुराः। शिवायकुसुमं
दत्वातद्दत्वाशंभवायचा। कुसुमाचलमासाद्यमोदतेमनुजःसुराः। शिवायवसनंदत्वातद्दत्वाशंभवायच। वसनाचलमासाद्य
मोदतेमनुजस्सुराः। शिवायाभरणंदत्वातद्दत्वाशंभवायच। भूषणाचलमासाद्यमोदतेमनुजःसुराः। दत्वासुवर्णमीशायतद्द
त्वाशंभवायचा। सुवर्णाचलमासाद्यमोदतेमनुजःसुराः। दत्वाछत्रंमहेशायतद्दत्वाशंभवायचा। रत्नछत्रसमाकीर्णःप्रयाति
शिवमंदिरं। शिवायचामरंदत्वातद्दत्वाशंभवायच। रत्नचामरसंकीर्णःप्रयातिशिवमंदिरं। ८०। शिवायवाहनंदत्वातद्दत्वाशंभवा

रामः
८१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यच। रत्नपुष्पकमासाद्यप्रयाति शिवमंदिरं॥ पद्यद्रम्यं महेशाय दत्वान छांभवायच॥ सर्वसौभाग्यसंपन्नः शिवलोकमवा
प्नुयात्॥ अशांभवायदत्तानि मेरुतुल्यधनान्यपि॥ व्यर्थानितानिसर्वाणिचारलीतसमानिहि॥ अशांभवाश्चचोराश्च पुल्कसाश्च
समाः सुराः ततोनतेदानपात्रं अपात्रत्वमताश्रिताः॥ अतस्तेनधनंशाश्वा अभाग्येनदुरात्मना॥ अशांभवेभ्यस्तद्दत्तंतेन दुःखम
वापसः॥ नतुल्यास्तेवनेतस्मिन् मिलिताश्चपरस्परं॥ मुहुराकोशनंकृत्वासनिरादबद्धेस्थिता॥ आक्रोशसकवनेतेषु सावमूदश
रियं शिरवाक्॥ अशैवानांगतिर्नोस्ति किमत्राक्रोशनैःफलं॥ ८८॥ अहोगतंधनंव्यर्थं अशैवेभ्योविमोहितः॥ दत्तंपात्रत्वबुध्यापिनोपा
त्रत्वंविनिश्चितं॥ कुबेरप्रदरगर्त्तपुरीषेष्वपिपातितं॥ यथावृथातथाजातं मशैवेष्वर्पितद्धनं॥ आक्रोशमपिकुर्वंतिसर्वोस्ताधनद
ताः॥ अशैवाधीनतांप्राप्ताः तेनकष्टंगताइति॥ ९०॥ अधमेष्ववजाते अशैवजलसंगमात्॥ धनंसर्वंगतंव्यर्थं दत्तंतेभ्योमसंशय
९१॥ जन्ममध्येकदाचिद्वाजलंवाशांभवायकिं॥ नदत्तंतेनपापेनपिशाचत्वमुपागताः॥ नदत्तंशांभवायान्नंमुक्तंवामोहतेपिवा॥ अ
तावनेपिशाचत्वंभवद्भिःप्राप्तमीदृशं॥ नदत्तंवसनंवाकिं शांभवायमहात्मने॥ तेनपापेनसंप्राप्तं पिशाचत्वंभवादृशैः॥ अशांभ
वकथासक्तैःनश्रुताशांभवीकथा॥ तेनपापेनसंप्राप्तं पिशाचत्वंमहावने॥ पूजनंनकृतंभक्त्याशंभोःशैवस्यवामुदा॥ तेनपापेनसं
प्राप्तं पिशाचत्वंमहावने॥ नकृतंमहेशस्यधनेसत्यपिमोहतः॥ तेनपापेनसंप्राप्तंपिशाचत्वंमहावने॥ शिवक्षेत्रादनेद्योगानकृ
तःपापयोगतः॥ तेनपापेनसंप्राप्तं पिशाचत्वंमहावने॥ १०॥ नदत्तंशिवलिंगेषुपत्रंवापुष्पमेववा॥ तेनपापेनसंप्राप्तं पिशाचत्वंमहा
१० नदत्ता दीपमालापि महादेवस्यमंदिरे॥ तेन०॥ अन्यदत्तापिदीपानां मालानेवावलोकिता॥ तेन०॥

वने। अन्यदत्तापि दीपानां मालां नैवावलोकिता। ग्रीष्मकाले नीरधारा लिंगे मुनष्ठिता मुदा। तेन पापेन संप्राप्तं पिशाचत्वं महा॥ वने
२। लिंगे परिमलद्रव्यं चंदनं चार्पितं नहि। तेन पापेन संप्राप्तं पिशाचत्वं महावने। वाणी न मधुरा युक्ता शांभवाय मनोहरा। तेन
पापेन संप्राप्तं पिशाचत्वं महावने। इति वाणीं मुहुः श्रुत्वा शिरस्ताडनपूर्वकं। परस्परं महीपृष्ठे पतितास्त्रयस्ते भृशं। तदानीमाग
तः कोपि शांकरस्तद्वनं प्रति। बिल्वपत्रार्थमुद्युक्तः तांस्तु श्रुत्वा गिरं तदा। ततो बिल्वानुपादाय सत्वरं मंदिरं ययौ। तामुवाच गिरं त
भ्यः स्वकीयेभ्यो पि विस्मितः। तद्ग्रामवासिनः सर्वे श्रुत्वा विस्मयमागताः। तदा प्रभृति सर्वेपि शांकरत्वमुपागताः। ततः कस्मिन्न
तस्तत्र ग्रामभस्म विभूषणा। तदानीमागताः शंभोः दूतास्तन्नातु मादरात्। सतस्मिन्नेव दिवसे भक्तया भस्मविभूषयाः श्रुत्वा वार्त्तां
तदुक्तां तामश्रौषल्लंजहौ तदा। । तदुक्तवार्त्ताश्रवणादनुसमः प्रतिक्षणं। भूदेवानतः परं कार्यं किमित्यस्यं तदुःखितः। मरणावसरे रामः
सयं श्रुत्वा वार्त्तां शुभावहा। अतः परं पूजनं वा लिंगे शक्तिः कथं भवेत्। श्रुता शिवकथा कापि न पुरा पापनाशिनी। अतः परं तु र ८२
द्रुनं किं कर्त्तव्यं शिवार्चनं। शैवान कोप्यागतो पि भोजितो पि न भक्तितः। पापग्राम निवासेन पापमेवार्जितं मया। १९४। धिग्धिग्धिग्दि
धिगयं ग्रामः शिवलिंगविवर्जितः। अशांभवजनाक्रांतः शिवभक्तविवर्जितः। धिग्धिग्धिग्धिगिदं वेश्म शिवभक्तिविवर्जितं। धनं
धान्यं गवां वृंदं कुलानां कुरुं तथा। अशेषं भुक्तमेतान्वयं शैवधरिरेपितं। इदानीमपि दानार्थं शांभवा नात्र सर्वथा। स्वमालेन
साज्येन पक्वान्नैर्विविधैरपि। शांकरा भोजिता नात्र गृहे धिग्धिग्धनं गृहं। इति मलय बद्धयाभोशांतोपाहि माभिति। उद्धूल्यम

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्नानं गानि स्नौ किं केन मृतस्ततः॥ नीत्वा दग्धो मृतश्चायं तत्सुतैरपि तादृशैः। ततः समागतं सर्वैः स्वगृहं प्रति विस्मितैः। ततस्तद्दहनो
द्भूतो धूमस्तद्वनसंगतः॥ आक्रान्तास्तेन धूमेन पिशाचास्तद्वनाश्रिताः। ततस्तद्धूमसंगेन ते सर्वे गतकल्मषाः। शिवलोकमनुप्राप्ताः
पुष्पकेषु स्थिताः सुराः॥ सहते न पिशाचेन शिववार्ता समुत्सुकाः। अग्रांसांशां करस्यैव भूपर्वतः पुनरादरात्॥ अतो महेशमहिमा म
हानेव महात्मनां॥ महानंदकरो नित्यं महापातकनाशकः॥ यस्यानुलापमात्रेण मुक्तिरासीन्निरूपणात्। तद्धूमसंगान्मुक्तास्ते पिशा
चास्तेति पातिनः॥२५॥ एतावतापि भगवान् महादेवः कृपानिधिः। ददाति स्थानमुत्कृष्टं योगिनामपि दुर्लभं॥ अघोरनरकावा
संक्रान्ता कल्पशतेष्वपि। पिशाचत्वमनुप्राप्य मुक्तास्तद्धूमसंगमात्॥ सोपि किंत्वां भवः किंतु पतिनायैस्सेव्यते। कदापि न कृतं ते
न महादेवस्य पूजनं। पूजितं शिवलिंगं च न दृष्टं तेन सर्वथा॥ न दृष्टस्त्वां भवस्तेन तत्संगस्तस्य दूरतः॥२१॥ मरणाभिमुखो वृद्धः सो
नुतापेन केवलं। मृतो भस्मकृपाक्रान्तः तस्य सा गतिरुत्तमा॥१२०॥ यं ध्यात्वा मुनयः कदापि विरतास्तत्वाच्च वेदाः परं नत्वा देवगणाः
कलत्रसहिताः पुत्रैः स्वमित्रैर्युताः। तं देवं तमसाकलय्य मनसा स्मृत्वा क्षणं वाक्षणे। संपूर्णाक्षपणादधिपार्थकलया कामं मुदं
प्राप्नुयुः॥१३१॥ ॥इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे सुरनंदीश्वरसंवादे नामैकत्रिंशोध्यायः॥३१॥
॥ ॥श्रीदेवा ऊचुः॥ आज्ञापयास्मान् भगवन्नस्माकमपि शंकरः॥ आराध्यस्तत्पदांभोजस्मरणं क्रियते सदा॥१॥ तस्यैवानुच
रास्सर्वे तदाज्ञाकारिणस्सदा। तां विना गतिरस्माकमन्यो नास्तीति किंचन॥२॥ तत्पादस्मरणेनैव नीयंते दिवसाः खलु जीवनं
निश्चितं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तावदस्माकं स्मृतं तच्चरणांबुजं ॥३॥ भवद्वृत्तकथाधारासुधापानेन मज्जनः ॥ पीनं दिने दिने वृद्धं भयास्यति न संशयः ॥४॥ ख
मिश्रगणितं द्रव्यं जैनैर्दत्तं दुरात्मभिः ॥ अशांभवेभ्यः कोतेषां भवित्री कुगतिर्वद ॥५॥ किंचतद्दानपात्रत्वं ये गतास्तेष्वशांभ
वाः ॥ तेषां का गतिस्तासु दुर्ज्ञेया खलु माहेशो ॥६॥ सहस्रशो जनास्तासां संकोचाय मम मंदिरे ॥ अशैवैरवर्त्तता बहुहाराधनंद
न्नतः ॥ धनवृद्धिः कृता तैस्तु आत्मपोष्यः परंतु ते ॥ अशांभवास्तावतापि तद्दत्तं तद्विधागतं ॥ यामादिकाले तद्दमैर्निरतास्ते तथा
पिते ॥ अशांभवास्ततस्तेषां गतिः का भगवन्वद ॥ शिवालयविहीनेषु देशेषु स्थितमादरात् ॥ अशैवधर्ममाश्रित्य धर्मोत
रपरायणाः ॥१०॥ एतादृशानां सर्वेषां विचारोयमयं मम ॥ प्रवृत्तस्तेन कालोस्य भूयानेव गमिष्यति ॥ एतादृशविचारेण क्षी राम:
णमायुर्दिने दिने ॥ यतस्त्वच्छिवपूजापि त्वरया संप्रजायते ॥१२॥ तेनतेन विचारेण दुःखितः सर्वदायमं ॥ तद्दुःखशमनोपा
यं नंदिकेश वदाधुना ॥१३॥ ॥ नंदिकेश्वर उवाच ॥ ॥ शृणु स्कंद त्वमस्य विचारस्यास्य किं फलं ॥ अशांभवाः पातनीयाः
कुंभीपाकेषु यत्नतः ॥१४॥ अशांभवकृतान्धर्मानधर्मानिति संस्मर ॥ चंडालैः किं कृतो यागः स्वर्गाय स्वर्गसाधनः ॥ य
दि पुल्कसनारीभिः वेदस्याध्ययनं कृतं ॥ तेनाध्ययनजं पुण्यं तासु संभावितं वन ॥१५॥ अतः सर्वे पातनीयाः कुंभीपाकेषु ते
यम ॥ आकल्पं तेषु ते स्थित्वा प्रयास्यंति पिशाचतां ॥ अतः परं पूजनीयान् वदामि बहुधा परं ॥ शृणुष्व सावधानेन शिवभक्तान्वि
शापतः ॥१७॥ यो विश्वनाथ मदनांतक कालकाल गौरीपते गिरिश चंद्रकलावतंस ॥ शैलेंद्रजाहृदयपंकजराजहंस पाहीति यावद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तितं शिवभक्तमाद्धुः ॥१९॥ काशीपते हर भवामरसार्वभौम भीमस्मरांधकरिपो गिरिश त्रिनेत्र ॥ भोभूतिगात्र वृषभाधिपप
त्रगात्रे पाहीति यो वदति तं शिवभक्तमाद्धुः ॥२०॥ वीरेश्वर त्रिदशनायक चंद्रमौले लीलातिलोलविकटाघटिताधदेह ॥ सिद्धे
श्वर रीरमण चंद्रपते मुकुंर्मे पाहीति यो वदति तं शिवभक्तमाद्धुः ॥२१॥ भोसंकटारमण शूलकरस्मरारे श्रीशीतलारमण भोक
कुलशेश शंभो ॥ ज्योतिःस्वरूप भगवन्मणिकर्णिकेश पाहीति यो वदति तं शिवभक्तमाद्धुः ॥२२॥ मुष्माविमुक्तपरमेश ॥ नंदि
केश श्रीमन्महेश्वर सुवर्ण पिनाकपाणे ॥ श्रीकालकूटविषनीलतराधकंठ पाहीति यो वदति तं शिवभक्तमाद्धुः ॥२३॥ उद्धूलना
दिरुचिरांगलसत्रिपुंड्ररेखाललाटफलकांधकमंदकेश ॥ आमंदकेश्वर महाघविनाशकेश पाहीति यो वदति तं शिवभक्तिमा
द्धुः ॥२४॥ श्रीवृद्धकाल वृषभध्वज कृत्तिवास श्रीलिंगलिंग निलयाव्ययमृत्युमृत्यो ॥ श्रीवक्रतुंडगणनायक ढुंढिराज पाहीति
यो वदति तं शिवभक्तमाद्धुः ॥ केदारनाथ कसदाशिव सोमनाथ ज्ञानेश दक्षहर नायक रत्ननाथ ॥ सिद्धेश घर्मगणनायक च ७० रा
ण्डिकेश पाहीति यो वदति तं शिवभक्तमाद्धुः ॥२६॥ एतादृशाः संततमर्चनीयाः सुरैरपीरैरपि किंनराद्यैः ॥ तस्सज्जया पूजित एव
नूनं गौरीसहाय समयासमयो ममायं ॥२७॥ लिंगं विलोक्य सहसा पपातः फलं वा पर्णेन चनीरसेमंकृत्य यतः प्रदद्यात ॥ रुद्राक्ष
भस्मकणभूषितपुण्यदेहो देहावसानमधिगस्य शिवं प्रयाति ॥२८॥ एतादृशान विनिगूढशिवार्चनादि ध्यानपारगुणसागर
सागरांस्तु ॥ द्वराद्धि लोकमुकुंदरता पिनत्वा तुष्टा भवंति मुनयो पिगणाश्च सिद्धाः ॥२९॥ येनार्चितं सकृदुमापति लिंगमके तेसा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५ एतादृशाः संभ्रमभर्जनीयाः सुरेश्वरार्यैरपि किन्नराद्यैः सुपूजया पूजित एव नूनं गौरीसहायः सममयो मयायं ॥

त्शुशोकजलधिः स्खलु तीर्ण एव ॥ तूर्णं प्रयाति गिरिजारमणं सतां वृंदैर्यः सतामनुदिनं सुकृतार्णवत्वात् ॥ आकर्णितां शिवकथां स्वप
दाक्षपंचा प्रक्षीणपातकमहांबुधिरेव सोपि ॥ तत्पूजनेन गिरिजारमणोति हृष्टः कष्टानि नाशयति सत्यमिदं मयोक्तं ॥ २१ ॥ यः पश्यति
स्मरहरप्रियलिंगपूजां भक्त्या प्रमोदमुपयाति विलोकनेन ॥ रोमांचिचिह्नितवपुः स्मितचंद्रमौलिसंज्ञां भवं विदुरयं बुधिनाशहेतुं ॥ तं
पुण्यकृत्तमक्षरेण्यमिति स्मरामि यः कालकालचरणांबुजभक्तियुक्तः ॥ युक्तः स एव गलितयमाहिभिरिव स्वपेवेमित स्मात्कोपि भुवनेष्वधिको
नरेशः प्रायः प्रातरिंदुशकलाभरणार्चनेन प्रीतं स्वरं स्मरहरं फलपुष्पदानैः ॥ तं पूजयंति मुनयोपि मुमुक्षवः स्वधन्यो महान्यो स्मदादिभिरिति
प्रणामेति धीराः ॥ २४ ॥ यश्शंकरार्चनपराः शिवकालकालमृत्युंजाथ मज्जालकमेव परमात्मवेद्यो ॥ मत्त्वा पारक्षकमहेश्वरनाम वाचनत्वाविन
गतिरिव प्रवदंति शैवाः ॥ २५ ॥ दारास्तथैव तनयास्तथचंद्रमौलेः ध्यानं तवैव बलमप्यगवाहयाति ॥ सर्वं त्वमेव तव सर्वमिति स्मरंतः संस
रभीतिमुपहाय शिवं प्रयांति ॥ २६ ॥ धन्यं मनः शिवपदस्मरणातुरं कंधन्यं विशालनयनं भुजजीवनं च ॥ तल्लिंगपूजनविलोकनलोल
मेव तस्मात्किमन्यदधिकं भुवि धन्यमस्ति ॥ २७ ॥ धन्यो लहीयचरणौ शिवतीर्थयात्रामेतौ करौ च शिवपूजनसाधनत्वात् ॥ धन्यं शिरः शि
वनतिप्रवणं क्षपायां तस्मात्किमन्यदधिकं भुवि धन्यमस्ति ॥ २८ ॥ धन्या हि तस्य जननी जनकोपि धन्यो धन्यं कुलं च रमणीतनयाश्च भृत्याः ॥
दासप्रश्रयस्य शिवलिंगसमर्चनेन सद्यः सैश्वलमपि मानसमित्यवेमि ॥ उन्मत्तवद्भ्रमति शंकरनाम दृष्ट्वा लिंगार्चनं कुसुमचंदनधूपदी
पैः ॥ पक्कान्नराशिभिरमंदमुदाय एव तस्याद्भुकास्मरणमप्यघनाशकं हि ॥ ३० ॥ यः कश्चिदेव भुवने प्रमितप्रभावो भावेन भावसहशो भुव

रामः
८४

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नत्रयेपि॥ भावस्यभाव भयक्लेशविहीनवृत्ते॥ भयाभवोनभवतीति भवोपिमेने॥ संसारभारपरिहार विहारहार हारोपहार परमा
दरमादरेण॥ द्वारद्वारदरमपास्यनमंति दारैः धीराश्च किंनर वरासह ते कुमारैः॥ ४२॥ किंवर्णयामि शिवभक्तजन प्रभावं गौरीपतिः प्रिय
तमः शिवभक्त एव॥ तं पुण्यपुंजमज पूज्यतमं विदित्वा तत्पूजनाय नियताभव नित्यमेव॥ ४३॥ यत्रेशंकरस्मरणमात्र पवित्रगात्राः तांस्त्वंत्रि
नेत्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषु गमनं नतवापि युक्तं तत्पूजनार्थं नियताभव नित्यमेव॥ ४४॥ शुल्कसिंदूसितभस्मपवित्रगात्रा
न्तांस्त्वं त्रिनेत्र निलयान्यमपश्यपश्य॥ तन्मंदिरेषु गमनं नतवापि युक्तं तत्पूजनार्थमपि तत्वमिदं वदामि॥ ४५॥ रुद्राक्षभूषणविभूषित
पुण्यदेहान्तांस्त्वं त्रिनेत्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषु गमनं नतवापि युक्तं तत्पूजनार्थमपि तत्वमिदं वदामि॥ ४६॥ श्रीबिल्वपत्रवि
वलिंगसमर्चनार्थान् तांस्त्वं त्रिनेत्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषु०॥ ४७॥ श्रीशैलनायकसमर्चनपूतचित्तान्तांस्त्वंत्रिनेत्रनिलया
न्यमपश्यपश्य॥ तन्मंदिरेषु०॥ ४८॥ श्रीकालहस्तिपतिपूजनसक्तचित्तांस्तांस्त्वं त्रिनेत्र निलयान्यमपश्य॥ तन्मंदिरे०॥ ४९॥ एकाम्रना
यकविलोकनपूतचित्तान् तांस्त्वं त्रिनेत्र निलयान्यमपश्यपश्य॥ तन्मंदिरेषु०॥ ५०॥ पुण्यारुणाचलविलोकनलोलचित्तान्तांस्त्वंत्रिने
त्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषु०॥ ५१॥ श्रीमद्बृहदीश्वरविलोकनसक्तचित्तान् तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषु०
५२॥ मध्यार्जुनेश्वरविलोकनसक्तचित्तान् तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषु०॥ ५३॥ श्रीकुंभघोणपतिपूजनसक्त
चित्तांस्तांस्त्वं त्रिनेत्रनिलयान्यमपश्य॥ तन्मंदिरेषु०॥ ५४॥ श्रीनंदिमंडलविलोकनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य॥ त०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

५५॥ मुनीनिविचिंत्यसततंमनमरेत्रिकायास्तुष्टोभवंतिसुकृतेरमितैर्यमान॥ तन्मंदिरेषु०॥ ५६॥ श्रीचंद्रलाचरणपूजनसक्तचित्तान्त्वां
त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदिरेषु०॥ ५७॥ तीर्थेशलिंगनियमार्चनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मं
दिरेषु०॥ ५८॥ काशीप्रदेशवशमानसपुण्यदेहान्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदिरेषु०॥ ५९॥ विश्वेश्वरार्चनविलोक
नसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदिरेषु०॥ ६०॥ शुद्धादिमुक्तपतिपूजनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यप
श्य। तन्मंदिरेषु०॥ श्रीमुक्तिमंटपविलोकनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदिरेषु०॥ भक्त्याकथंचिदनुनासर
मन्नपूर्णापादारविंदभजनप्रवणाःशिवास्ते। तन्मंदिरेषु०॥ आनंदभैरवविलोकनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य
तन्मंदिरे०॥ ६७॥ श्रीढुंढिराजचरणार्चनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदिरे०॥ विश्वेश्वरार्चनविलोकनसक्तचि रामः
त्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदिरेषु०॥ श्रीकालभैरवविलोकनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य। तन्मंदि ८५
रेषु०॥ ॐकारनायकविलोकनसक्तचित्तांस्तांस्त्वंत्रिनेत्रनिलयान्यमपश्यपश्य॥ तन्मंदिरेषुगमनंनतवापिपुंसांतत्पूजनार्थमपितत्त्वमि
स्वदामि॥ ६८॥ दूतास्तवातिकठिनाःखलुशिक्षणीयास्तेधर्मबुद्धिरहितादुरितप्रवृत्ताः॥ नद्योगतस्तवविशेषतएवधर्मोनाशंभयास्यांति
सतेजशिवापराधेः॥ ६९॥ दूतास्त्वमीनियदितेशिवमंदिरेषुयेवपुतत्पदंमार्गमहार्हदेशे॥ नर्हिप्रकुप्यतिशिवोपियमातएवतेतावदा
रतएवनिवारणीयाः॥ ७०॥ येशंकरस्मरणमात्रविधूतपापास्तेशांभवास्तवयमान्यहमर्चनीयाः। तेषांगृहेषुनकदापिभटाःप्रयांतु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१ येलिंगपूजनरताः सततं प्रहृष्टास्ते शांभवास्त्वयमान्वहमर्चनीयाः ॥ तेषां० ये रुद्रजपनप्रभवपुण्यसमृद्धाये
१ त्तास्ते शांभवा० ॥ तेषां० ॥ ये वै त्रिपुंड्ररुचिरामलफालभागास्ते० ॥ तेषां० ॥ रुद्राक्षभूषणविशोभितकंठदेशास्ते० ॥
द्रहमार्गमपि तेन विशंतु मोहात् ॥ ये शांकरस्मरणविस्मृतकायचेष्टास्ते शांभवास्त्वयमान्वहमर्चनीयाः ॥ तेषां गृहेषु न कदापि भटाः
प्रयांतु तद्द्रहमार्गमपि तेन विशंतु मोहात् ॥ ५ ॥ ये शंभुलिंगनिहितक्षणरश्मिजालास्ते शांभवास्त्वयमान्वहमर्चनीयाः ॥ तेषां गृहे
षु न कदापि भटाः प्रयांतु तद्द्रहमार्गमपि तेन विशंतु मोहात् ॥ ८ ॥ ये लिंगपूजनमहोत्सवलोलचित्तास्ते शांभवास्त्वयमान्वहमर्चनीयाः
तेषां गृहेषु न कदापि भटाः प्रयांतु तद्द्रहमार्गमपि तेन विशंतु मोहात् ॥ ९ ॥ ये शांभवार्चनसमर्जितवित्तभारास्ते शांभवास्त्वयमान्वहमर्च
नीयाः ॥ तेषां गृहेषु न कदापि भटाः प्रयांतु तद्द्रहमार्गमपि तेन विशंतु मोहात् ॥ १० ॥ ये चंद्रचूडकलनामृतपानलोलास्ते शांभवास्त्वयमा
न्वहमर्चनीयाः ॥ तेषां गृहेषु न कदापि भटाः प्रयांतु तद्द्रहमार्गमपि तेन विशंतु मोहात् ॥ ११ ॥ धन्या शंकरनामधेयसुसुधाधाराधरासारभृज्जि
ह्वा जिह्मगराजराजविनुता धन्येति मान्येति च । साजिह्वा बहुजन्मसंचितविराभ्यस्तातिपुण्यार्जिता सेयं पुण्यसुधानिधिः खलु ससंल
भ्यः शिवात्स्वमहात् ॥ १४ ॥ ॥ इति श्री स्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे सुरनंदिकेश्वरसंवादो नाम त्रिंशोध्यायः
३० ॥ ॥ शिवार्पणमस्तु ॥ व्यास उवाच ॥ इत्युक्तं तद्वचः श्रुत्वा प्रहृष्टास्ते सुरास्तदा ॥ विश्वस्यंत पुनर्नत्वा कृतांजलिपुटा जगुः ॥ १ ॥ देवा ऊचुः ॥
श्रीनंदिकेश्वर स्वामिन् शिवविज्ञानसागर । अनेन किं कृतं पुण्यं तद्ब्रूयान्महि संवद ॥ २ ॥ श्रीनंदिकेश्वर उवाच ॥ ॥ तत्पुण्यश्रवणादेव भ
वतां विस्मयो भवेत् । तत्वज्ञानविहीनानां सर्वमाश्चर्यसाधनं । शिवपूजाप्रभावाब्धिं विदुर्ज्ञानविवर्जिताः । भवतस्तापसाः सिद्धाः गंधर्वाः ॥
किन्नरा अपि ॥ ४ ॥ शिवप्रभावरूपाणां रत्नानां सागरः शिवः । अतः शिवो विजानाति स्वतत्वं न तरां जनः ॥ ५ ॥ अस्माभिरपि तत्तत्वं लेशतस्त
१ तेषां० ॥ ये बिल्वमूलशिवलिंगकृतप्रणामास्ते शां० ॥ तेषां० ॥ ये बिल्वपत्रकृतवनाहृतकंटकाग्रास्ते० ॥ तेषां० ॥ ये बिल्वपल्लवकृते
१ न्नेन लिंगपूजास्ते० ॥ तेषां० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सादतः॥ ज्ञातःकथंचिदन्येनकथंज्ञेयःसुरादिभिः॥ ६॥ अपूर्वमपायोयेनसंचिताःस्वगृहेस्वतः॥ सतत्त्वविदन्यस्कततत्त्वंवदस्के कुरु
रा॥ यस्यपरंरत्नस्ययन्मो॰ल्यंतत्तेनज्ञायतेपरं॥ रत्नतत्त्वंविजानातिसतुरत्नपरीक्षकः॥ नवरत्नपरीक्षायांसर्वेदक्षाःस्वभावतः दा
ज्ञायपीवलुप्रस्कनिसःसर्वज्ञएवहि॥ ९॥ सतावलिसस्सर्वज्ञशिरोमणिरितिश्रुतः॥ ज्ञारूपाणिस्ततस्सोयंतत्तत्त्वंवेदवस्कतः॥ १०॥ र
त्नेषुचविविज्ञेषुतेषुदिव्यानिकानिचित्॥ रत्नानितान्यमूल्यानितानिविद्यानिनामराः॥ शिवधर्मात्मकंरत्नंगोपनीयंविशेषतः॥ अति
भक्तायदातव्यंनाभक्तायकदाचन॥ १२॥ अत्यल्पस्यरसस्यापिस्पर्शादेवकंचन॥ लोहाचलःसुवर्णत्वंप्राप्नोतीत्यवधारितं॥ अग्निलेशे
नतूलाद्रिभस्मसाज्जायतेक्षणात्॥ अत्यल्पेनौषधेनापिमहाव्याधिलयोभवेत्॥ सक्ष्मास्थिरयंगमध्येप्रविष्टोंगविनाशकः॥ विषम
प्यल्पमेवयोगयुक्तंदेहविनाशकं॥ १५॥ तथैवशिवधर्मोपिसूक्ष्मःपापविनाशकः॥ पुण्यसंपत्समृद्धिंचसकरोतिनसंशयः॥ धर्माणामुत्त
मोधर्मःशिवधर्मस्सनातनः॥ सर्वोत्तमोत्तमत्वेनयथागीतःसदाशिवः॥ यथासौवैमहादेवःसर्वदेवशिखामणिः॥ तथायंशिवधर्मो
पिसर्वधर्मशिरोमणिः॥ शिवधर्मात्परोधर्मोनास्तिनश्रूयतेपिच॥ सत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥ शिवधर्मोन्यधर्मेषुधर्मोभ
सत्वनिश्चयात्॥ तद्धर्माचरणात्किंवाफलंसंभाव्यतेभुरा॥ कुर्वंतुतान्विमोहेननतेभ्यःफलमुत्तमं॥ २१॥ रत्नभ्रमेणस्फुटितेकाचंगृह
रियोनरः॥ सतेनरत्नाभरणधारणोत्पन्नधर्मवान्॥ २२॥ अतिस्वच्छस्यरत्नस्यकपसाप्यनकोटिभिः॥ ततस्तद्रत्नमुत्कृष्टंनहीनापेक्षया
खलु॥ २३॥ किंचदेवाधिदेवस्यप्रत्यियंनदूरस्मृतं॥ तदन्यत्सर्वमवरमसदाचारदूषितं॥ २४॥ अयंतुभिन्ननयःनस्पितापापभाजनंत

+२ शिवधर्मान्विज्ञाय धर्माभासरतानराः

रामः ८६

न्माताभ्रातरस्तस्यतत्कुलंचनसंशयः ॥ अयंछिन्नेकंटककारिप्रसूनंलिंगमस्तके ॥ मरणावसरेप्राप्ते पातयित्वामृतः सुराः ॥
२६ ॥ लिंगपूजनमेतेनकुसुमेनकृतंमया ॥ अपवर्गदमित्येवंज्ञात्वातेननपातितं ॥ ज्ञात्वाधर्मस्यकरणंशिवपूजालकः संतु फ
लयज्ञवितत्तावद्दूरेपिननिश्चितं ॥ २८ ॥ अज्ञात्वापिकृतोधर्मशिवपूजालकः सतः ॥ सर्वोभीष्टप्रदोनूनंमितिवेदेविनिश्चितं ॥ अ
नेनैवहि धर्मेणागणत्वंप्राप्यबालकः ॥ शिवप्रियतमोभूत्वास्थास्यत्येवनसंशयः ॥ ३० ॥ पुरापापरतः कश्चित् विंध्यस्थोशुसंस्थित
तेनपापेननीतानिदिनानिप्रतिवत्सरं ॥ ३१ ॥ तेनयावत्कृतंपापंतत्सापगण्यमानिन ॥ पुनः पुनः सपापेषुनिरतोविरतोपिन ॥ ३२ ॥ सजार
जस्वभावेनजारस्त्रीनिरतोपिसः ॥ तदुच्छिष्टाशनोनित्यंकर्मांतरविवर्जितः ॥ ३३ ॥ तेनैवासादिताकापिजारिण्याकंत्रकातया ॥ रेमेसपा
पनिरतोयौवनाक्रांतजामुकः ॥ ३४ ॥ तस्यामुत्पादयामाससकन्यकांसापिसुंदरी ॥ यौवनेनसमाक्रांतातयारेमेसपापधीः ॥ ३५ ॥ तस्यां
चजनयामासकन्यकांसापिपापधीः ॥ तयापिरेमेसोप्याहतंकदाचिन्मनोहरा ॥ कन्यकोवाच ॥ ३६ ॥ शयनेकुसुमापेक्षाजायतेमम
तानिमे ॥ आनयाद्यान्यथाक्रीडानवनाद्यभविष्यति ॥ ३७ ॥ इत्युक्तंतद्वचः श्रुत्वाशिवारामेययोनिशि ॥ सशिवार्चनयोग्यानि दृष्ट्वा
पुष्पाणिविस्मितः ॥ अतः परंप्रयत्नेनसर्वंपुष्पवनंमया ॥ समूलंभवनंनेयंवनस्पान्ममंदिरे ॥ ३९ ॥ एतादृशानिपुष्पाणिनान्य
त्रभुवनत्रये ॥ अतः सर्वाणिनेयानिमूलैः पुष्पवनानितु ॥ ४० ॥ तत्रैकंपुष्पमादायसुगंधमतिसुंदरं ॥ वनाद्विनिर्गतः पापीधावनेन
ययौकथं ॥ ४१ ॥ तत्पुष्पगंधसंबंधवातपोतजिघृक्षया ॥ दृश्यकोमहाकायोस्वबिलान्निर्गतः सुराः ॥ आघ्रायाघ्रायतंगंधंसर्पस्त
+ १ मंदिरंगतः ॥ तंपुष्पकरमालोक्यतत्क्षणेसमुपाद्रवत् ॥ ततः सर्पसमाक्रांतः सभीतो +

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्यं

श्री॰ बहिरागतः॥ सर्पेणादष्टः तस्मुष्टेपतितं लिंगमस्तके। तत्रैदेवास्समानीतं नामेदं लिंगमुत्तमं केनचित्सज्जनेनकर्तुं तत्रैवस्थापितंस्थि
तं॥ ससर्पो लिंगमावेष्ट्य तत्पुष्पाघ्राणनप्रियः। लिंगंसंपारयामास शीतलं तं स्वदेवने॥ ४९॥ ततः ससर्पसंदष्टो मृतस्तत्र हि संश्रयः
तदा महाश्चर्यं दृष्ट्वा च भावे गिरिजा सती॥ ॥सदाशिव उवाच॥ गौरि कौतुकमस्त्येकं तद्दृश्यं शृणु सादरं। यत्रधामेश्वरा स्तेजो म
त्किमसज्जनोप्यवत॥ अस्ति पुष्पवरं रम्यं विंध्यदेशे मनोहरं। तत्पुष्पाघ्राणनं तावित्तत्कृष्णोयातिसुंदरः। तत्रवातं नसारोपि न भविष्यति
सर्वथा॥ मत्रेकेन कृतं रम्यं विंध्यदेशे मनोहरं। तद्धनेगौरि सुंदरं॥ ५०॥ कमंडलेन कुत्रापि तदृश्यं वनमंतिके। सुगंधाख्य तद्वृक्षैः वृति
कंटकमरूहा॥ तच्चंदनतरुस्पर्धां कुर्वति मत्स्पर्शैश्चिवे॥ स्वगंधसदृशो गंधो न भवत्स्विति शैलजे॥ ५१॥ सुचंदनतरुत्वेन तरवस्तामिताज
नेः। तत्पुष्पेष्वपियो गंधः सोपितावन्मनोहरः॥ ५२॥ मंदारस्य सदा तत्र गंधस्पर्धां करोति सः। गंधोपि कंटकतरुश्च सदा धिष्ण्य नस्सदा राम:
५४॥ तत्र न भ्रमराणां वा प्रवेशः शैलकन्यके। तत्पुष्पद्वयमूलेषु कुल्याः संति मनोहराः। सुगंधजलकल्लोलमालाकुलसमाकुलाः॥ ८७
प्रत्येकमालवालं च द्रुमाणां विस्मयावहं। इत्युक्तं तद्वचः श्रुत्वा गौरी संतुष्टमानसा॥ शिवेन सह संप्राप्त तद्वनं पुष्पकाश्रितं तस्मि
न्वने दीर्घिका पिरत्नसोपानसंकुलाः। तत्तीरे रत्नसंबंधं शिवमंदिरमुत्तमं। रत्नप्रासादशोभाभिरलंकृतमिवादरात्। तन्मंदिरे
ब्रह्मोदेवः सांबस्तत्र समागतः। ततस्तल्लिंगमालोक्य शंकरो गिरिजान्वितः॥ आलिंग्य भक्त्या तल्लिंगं स्थितं तत्क्षणं स्थितः॥ ५९॥ ता
नि पुष्पाणि संवीक्ष्य शंकरो लिंगमस्तके। स्तोत्रत्रयेन तुष्टानि संतुष्टः शिवयासह॥ ६०॥ अपारदीपमालाश्च दृष्टास्तत्र शिवालये

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रत्नस्तंभेषु चित्राणि ददर्श गिरिजापतिः। ततो बहिर्विनिष्क्रम्य तरुमूले सुसंस्थितः॥ तदा तत्र रुजापार कुसुमासारसंवृतः॥ ६२॥ त
त्कुल्याजलमास्वाद्य फलानि विमलान्यपि। तत्र गंधफलीगंधं समाघ्राय पुनः पुनः॥ स्वर्गे गंधफली पुष्पसंकुलं तद्वने सुराः॥ र
जे मनोहरं व्याप्तं स्थूलैर्गंधफलीफलैः॥ तान्याघ्राय महादेवः पीत्वा तत्र समादरात्॥ सुधावधीरणां चक्रे धिग्धिग्धिक् सुधेति च
ततः परं सहरेणानामेदं लिंगमुत्तमं। सर्पावेष्टितमालोक्य तत्र गंतुमनो दधे॥ ६७॥ बाणलिंगमिदं रम्यं मत्कृते नीतमादरात्। तत्र
क्षणं वसाद्य मे तद्यतो मम मंदिरं। ६८ नरत्नमंदिरे प्रीतिमपि लिंगेषु वा मम॥ एवं लिंगे परं प्रीतिस्तल्लिंगं मंगलावहं॥ तल्लिंगना
लोकनादेव ममानंदः प्रवर्धते। तल्लिंगसदृशं लिंगं नास्ति ब्रह्मांडगोलके॥ ७०॥ इति ब्रुवन्तमतिं देवः शिवया संयुतः शिवः॥ यये
तन्नाम देलिंगं तत्रापि क्षणमास्थितः। तत्पुष्पं तु समाघ्राय नित्यगंधं मनोहरं॥ संतोषं परमं प्राप तया गिरिजया सह॥ येन पुष्प
वतादत्तं पुष्पमेतन्मनोहरं। एवा लिंगे स्वयंभूतं तस्य मुक्तिर्भविष्यति। पुनः पुनः परं गंधं समाघ्राय महेश्वरः॥ सर्पैः संवेष्टिते लिंगे
निवासं च चकार सः॥ एतद्दृष्टं न हेतुत्वमपरं मुक्तिसाधनं। भोगिभूषणता तेन कृता किल ममाधुना॥ ७४॥ इत्युक्त्वा कुणपहृदा
कुवकिंकरवेष्टितं॥ ददृशाते विमानस्थं मृतं चत्वारः गणेश्वराः॥ ततः परं ययौ सावस्तमुत्सवमनेकधा॥ दृष्ट्वा प्रहृष्टस्तत्रैव समारामप्र
तिसत्वरं। तस्मिन् लिंगार्चने श्रेष्ठं यस्य वा स्यापि मुक्तिदं॥ लिंगार्चनसमं पुण्यं न भूतं न भविष्यति। ७५॥ शिवार्चनजपुण्येन पुण्यवा
न यमित्यसतः॥ एतस्यागमनं तावद्युक्तं मम मंदिरे। ७८॥ पुरा कश्चिद्दरिद्रो भक्तत्र श्रीशैलमंडले। तेन पापान्यपाराणि द्विजेनापि
४५ एन दुर्धं समाघ्राय कोपिकाकोदरे महान्॥ चकार्बीनत्वं लिंगं स्वकाय परिवेष्टने॥ १

छतानिहि॥ भिक्षागारेषु विचरन् करोति कृपयान्वहं। तैः कपोर्जीवनं तस्य कंटकारिफलैरपि॥ ८० फलानि तानि यत्नेन समानीय
दिने दिने। राशिं करोति भाग्येन नर्मदालिंगमस्तके। तान्यानीय स पक्वानि छित्वा पक्वाग्नये ततः। नर्मदालिंगनिकटे समक्षयति
सादरं॥ एवं संवसतस्तत्र प्रदोषे समुपस्थिते। तत्र स्नात्वा नदीतीरे स्वेदापनयनाय स॥ ८१ ततः परं यथापूर्वं कंटकारिफलैर्जलैः
प्रोक्षिते सर्ववत्तत्र राशिं तावच्चकार सः॥ ८० पश्चाद्दूर्वांकुरैस्तानि छादयामास सत्वरं। विलंबेनाग्नमात्रे मास्ति तेन विनिश्चय म-
त्वा ततः स्नात्वा परस्तं नर्मदालिंगसंनिधौ। श्रांतश्च कीरशयनं काष्ठैः प्रज्वाल्य पावकं॥ ८३ सा मंत्रयोदशी स्वदाद्दीन नक्षत्रसंयुता
तस्याः प्रदोषसमये तदासीच्छिवपूजनं। अज्ञानान्निर्मितं त्वद्य जलानीतिमलान्य सः। कृता दूर्वान्वयापीति नास्थातल स्पशिवार्चने रामः ५८
८४ परं तु नर्मदे लिंगे तत्सर्वं तेन कल्पितं। पूजात्वेनैव निष्पन्नं मंत्रं नैवेद्यतां गतं। दीपत्वेनैव निष्पन्ना काष्ठज्वाला मनोहरा प्रभा
मत्वेन निष्पन्नं शयनं तस्य तन्नदा। तस्य भाग्यवशाद्देवं संपन्नं शिवपूजनं। तेन तुष्टो महादेवः करुणासागरः प्रभुः॥ ८७ ततः परं द- ८८
दर्शायं स्वप्नं सर्वार्थकामदं। स्वप्ने दूर्वाचितं लिंगं नार्मदं तद्ददर्श सः। परितो रत्नसदनं रत्नप्राकारसंवृतं। दिव्यभोगसमाकीर्णं रत्न-
ज्वालासमन्वितं॥ ८८ दिव्यनारीसमाकीर्णं मनराजिविराजितं। गजकोटिसमाकीर्णं भक्तभृत्यसमन्वितं। दासीकोटिसमाकीर्णं र-
त्नाभरणमंडितं। इदमत्यद्भुतं दृष्ट्वा प्रहृष्टो विस्मयं गतः। दिव्यनारीमुखं दृष्ट्वा बभाषे वचनं मुदा॥ ८९ कासि त्वं चंचलापांगि कम-
लामललोचने। कस्यांगनासि सदनं कस्येदं मणिमंडितं। अश्वाः कस्य गजाः कस्य दासाः कस्य वरानने। एतादृशं महद्भाग्यं कस्य दु-

४१ फलैरप्यर्चितं लिंगं नैवेद्येन समन्वितं॥ दीपज्वालादीपितं स पश्चादुदितः स्फुरः॥

३१ गोकोटिवृंदसंयुक्तं अश्वकोटिसमन्वितं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पयाश्रयस्यना॥ त्वयाकिमागतंभव्येमसार्धमतिसुंदरि॥ हिमचामरवातेनमंतोषयसिसादरं॥ प्रतिक्षणंशरीरंमेननवंनवमुपजा
यते॥ सौंदर्यवृद्धिरस्यस्यनवमेवप्रतिक्षणं॥ इतितद्वचनंश्रुत्वासालमाहमनोरमा॥ संपादयंतीतच्चित्तेपरमानंदसागरं॥ ३॥ योग्या
धिदेवतासाहंप्रेषिताशंकरेणहि॥ त्वत्सेवार्थंनिमुक्तास्मिमत्तुल्याःसंतिकोटिशः॥ त्वयाद्यनार्मदेलिंगंप्रदोषसमयेशिवः जलैः
समन्वितःशुद्धैःकंटकारिफलैरपि॥ दूर्वांकुरैश्चदीपैश्चनैवेद्येनापिपूजितः॥ प्रणामेनापिसमयःसोयंपुण्यतमःस्मृतः॥ एतादृशो
महायोगोदुर्लभोदेहिनामतः॥ अस्मिन्योगेपूजितात्वतुष्टोभवतिशंकरः॥ १०६॥ शिवदेयेषुभाग्येषुभाग्यमल्पमिदंत्वया॥ प्राप्तंप्रा
प्स्यमग्रेतुभाग्यंसंख्याविवर्जितं॥ १०७॥ अगणितमहिमायंदेवदेवोमहेशः॥ गिरिवरतनयांगालिंगितोमंगलानि॥ वितरतिबहु
कालानंदयोग्यानिनित्यंशिवविभवमहाब्धिव्राजसंख्यानननं॥ इतिश्रीस्कांदेमहापुराणेहिमवत्खंडेशिवरहस्येतृतीयं
शासुरनंदिकेश्वरसंवादोनामैकत्रिंशोध्यायः॥ ३१॥ नंदिकेश्वरउवाच॥ इत्याकर्ण्यवचस्तस्याःसोपपाम्यातिभक्तितः
आनंदधारासंक्रांताबभाषेवचनंमुदा॥ कियत्कालमिदंभाग्यंदेविमहृद्ध्नामेप्यसि॥ शंकरस्यप्रसादोपिमयिजातःकथंवद॥ २॥ इ
त्युक्तंतद्वचःश्रुत्वाबभाषेसामनोरमा॥ रमारमणनेत्राब्जपूज्यांघ्रिस्मरणोद्यता॥ संपादयंतीबहुधाविस्मयंसुस्मितानना॥ शिव
लिंगार्चनध्यानस्वरूपस्मरणोत्सुका॥ त्वयायद्यपिपूजायाःस्वरूपंविदितंनुना॥ तथापिहृदयाशंभोःकृतार्थोसिनसंशयः॥ कंटकारि
फलानांतुरक्षणायायपरंनृपैः॥ आच्छादनंकृतंसायंतज्जातंशिवपूजनं॥ ४॥ तदिदंलिंगमुत्कृष्टंक्षेत्रमप्युत्तमोत्तमं॥ कालोपिसोयमुत्कृष्टः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शिवपूजनसाधनं॥ महादेवः स भगवान् दीनवत्सल इत्यतः॥ निमित्तं किं विद्यात्मो बद्दौ भाग्यमनुत्तमं॥ एतस्मिन्समये भक्त्या
ज्ञात्वा लिंगार्चनं कृतं॥ करोति पूजां यो मर्त्यः स साक्षादीश्वरो भवेत्॥ एतादृशः पुण्यकालः दुर्लभः खलु देहिनां॥ दुर्लभं च भवे देवम
हादेवार्चनं परं॥ अज्ञात्वा विधिं यस्तु करोति शिवपूजनं॥ न तु कामं इह भवत्येवं ज्ञातं चेत्किं वदाधुना॥ अतः परं प्रमादं वर्जित्वा शंकरपूजनं
कुरु भाग्यमिदं तेन स्थिरं तव भविष्यति॥ यस्मिन्दिने प्रमादस्ते भविष्यति शिवार्चने॥ तस्मिन्नेव दिने भाग्यमेतदन्यत्र यास्यति॥ भो
ग्यांगनास्तु सततं शिवपूजनतत्परान्॥ विचार्य संचरंतीति प्रमादो मास्तु सर्वथा॥ ~ ॥ यादृशस्तादृशो वास्तु शिवाराधनतत्परः॥ तत्ता
दनुसृत्यैव भाग्यं तिष्ठति केवलं॥ भाग्यांगनाविहारस्य स्थलं शंकरमंदिरं॥ तद्विहाय न कुत्रापि यांति भाग्याधिदेवताः॥ यथा धनिकम्
लोकं यांति वारांगना तथा॥ हरंति लोकभाग्यानि सविहारा प्रियां तितं॥ १५ ॥ भाग्यांगनामंदिरं तु नान्यच्छंकरमंदिरं॥ अतः शंकरतोष रामः ८९
प्य कुरु शंकरपूजनं॥ अकुलीनः कुलीनो वा ज्ञानी वाज्ञानवर्जितः॥ शिवाराधनमात्रेण भवेद्भाग्यांगनापतिः॥ अत्राप्युदाहरंतीममिति
हासं पुरातनं॥ शिवपूजारत्नतज्ज्ञानराशिविजृंभितं॥ १८ ॥ पुरा कश्चिदभूद्राजा सर्वभाग्यसमन्वितः॥ धनधान्यादिसंपूर्णमंदिरे तस्य
सर्वदा गजाश्वकुलसंकीर्णे संकीर्णे महिषीगवैः॥ दासीनां च मनोज्ञानां क्षेम हैन समावृतं॥ एवं स भाग्यसंपन्नो विस्मृत्य शिवपूजनं
निद्राक्रीडादिनिरतो युवतीजनसंवृतः॥ तादृशस्य महद्भाग्यं क्षणेन विलयं ययौ॥ शिवपूजापरित्यागस्तन्महाभाग्यनाशकः॥ तद्दुर्लभं
मितागारासन्नाकारालयं गता॥ गजानां च कुलं नष्टं अश्वानामपि सत्वरं॥ दासीनां च कुलं नष्टं भृत्यानामपि सत्वरं॥ दारास्तस्य महाराः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सहाराश्वलयंगता॥ नदेनराज्ञायोनष्टाः तथैवधनराज्ञाय॥ विनष्टंगोकुलंतस्यमहिषीकुलसंकुलं॥ अकस्माज्जातमेवंकिंसर्वं
नष्टमिदंकथं॥ अनेनहेतुरत्रास्तिकोवासोपिनदृश्यते॥ इंद्रपापिरवल्लुस्पर्धाकृतापूर्वंमयाधने॥ धनस्यतस्यनाशोभूत्कथ
मद्यक्षयोतेर॥ इतिदुःखेनसंविष्टोवनमापदुरासदं॥ क्षुधार्त्तस्तृषितःश्रांतश्चिंताशोकसमाकुलः॥ ददर्शशांभवंतत्र विस्त्रम
रूमहावने॥ शिवलिंगार्चनरतंभस्मोद्धूलितविग्रहं॥ भस्मत्रिपुंड्रसांकंरुद्राक्षाभरणाश्रयं॥ निमीलिताक्षंध्यायंतंमहादेवम
नामयं॥२९॥ तंदृष्ट्वासनृपालःशांभवोत्तममादरात॥ प्रणम्यदंडवद्भूमावुवाचसकृतांजलिः॥३०॥ राजोवाच॥ भगवन्शांभवश्रेष्ठ
नीलकंठस्सनिष्ठुरः॥ तेनाद्यसंहृतंमार्गेअभाग्यस्यदुरात्मन॥३१॥ यदस्तिसहमानत्वंमहादेवश्रुतिश्रुतं तस्मिंस्तिष्ठतिनित्यंपि
सकथंमपिनिष्ठुरः॥३२॥ अन्यस्यसहमानत्वंनश्रुतंनापिवस्तुतः॥ किंचान्यस्तादृशःकोवाप्यस्तिभुवेपादुर्लभः॥ इतितद्वचनंश्रु
त्वा दृष्टोरुषापिशांकरः॥ तमुवाचमहाधीरोराजानंदीनवत्सलः॥३४॥ शांभवः॥ यदुक्तंसहमानत्वंमहादेवसनातनं॥ तद्दुदोक्तमत
स्तस्यनिष्ठुरत्वमसंगतं॥३५॥ हृताशिस्तामहेशेनदुर्वृत्तस्यतवाधुना॥ शांकरस्मरणात्यक्तंतथाशंकरपूजनं॥३६॥ उदारदारसंभो
भोगदानविचक्षणा॥ निरूपाक्षानस्मृतोहित्वयाभोगाकुलेनतु॥३७॥ यत्तसरिमरुद्रयंकस्तूरिरससूषितं॥ तत्समर्पितमीशायस्वोप
भोगायकल्पितं॥ दुकूलान्यतिरम्याणिशंकरानर्पितान्यपि॥ सहसास्वोपभोगायकल्पितानिनवान्यपि॥३९॥ भूषणानिविचित्राणिशं
करानर्पितान्यपि॥ कल्पितानानिप्रमत्तेनस्वोपभोगायकेवलं॥४०॥ यदन्नंक्षीरसंयुक्तंशंकरायानिवेदितं॥ तद्भुक्तमद्यवुष्टेनतनजातासि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दुर्भगेः ॥ ४१ ॥ यद्दत्तं पतये दत्तं तद्दत्तममृतं खलु । तद्विनं विषमे वेति विषभोगकुतः सुखं ॥ ४२ ॥ भाग्यनाशेन नष्टश्च भाग्याः सर्वेप्यसंश
ये ॥ अतः भाग्यविहीनस्य क्षतं इत्यवधारितः ॥ ४३ ॥ दरिद्रस्य मृतस्यापि नोतं खलु दृश्यते । दरिद्रो मृत एवेति तस्मात्सौख्यं कुतो भवेत् ॥
असौ स्वनिर्धरे वाप्यमशोभवमिति स्मृतः ॥ अतस्त्वजाधुनाता वशशांसौख्यावगाहिनौ ॥ ४४ ॥ येन दत्तं महद्भाग्यं तद्विस्मरणमेव ते
अज्ञानित्वेन निष्पन्नं अतस्त्वत्केन नश्यति ॥ भाग्यं प्राप्य खलु मत्ताः भाग्यदं विस्मरंत्यतः । अभाग्या एव ते तावद्भविष्यंति न संशयः ॥ ये
तद्दारा महोदाराः सहारा हारतालये ॥ हारत्वे सति तत्सर्वं भविष्यति न संशयः ॥ आयुष्मंतो भाग्यवंतो रूपवंतो विशेषतः ॥ शांभवार
वतस्सर्वे शांभवामनुधावति । एतावद्भाग्यसमये कथं नाराधितः शिवः ॥ कदापि न कृतं राजन्मतदा शंकरपूजनं । न कारितं मंदिरं वा रत्न
मंडलमंडितं । महेश्वरस्य विहाराय रत्नाभरणभूषितं ॥ ५१ ॥ दीपमालाश्च न कृताः कोटिशः शिवमंदिरे । नवान्नराशिभिर्दत्तं नैवेद्यं राम: १०
कारयन्तु । न कृता घृतकुल्यापि शिवे नैवेद्यकल्पने ॥ मधुकुल्यापि न कृता क्षीरकुल्या विशेषतः ॥ श्रीमहादेवनैवेद्यं न भुक्तं भक्ति
पूर्वकं । नशांभवसमूहेभ्यो दत्तमन्नं विशेषतः । नवरत्नानि दत्तानि दिव्यान्याभरणान्यपि । दुकूलानि न दत्तानि शिवप्रीत्यर्थमादर
त । यो महद्भाग्यसमये नाराधयति शंकरं । स दुर्भगो भवेत्सद्यः शीघ्रं भाग्यविवर्जितः ॥ अभाग्यांबुधिमग्नानां भक्तिः शांभवी न जाय
ते । केवलं भाग्यसंपन्नास्ते कुर्वंति शिवार्चनं । शिवनामोच्चारणेन नयंति समयं मुदा । तेतावदंति धन्यास्ते पूजनीयाः प्रयत्नतः ॥ ५८
अतः परगते भाग्ये शिवपूजार्चने मतिः । न भविष्यति दुःखेन दुःखांबुधिनिमज्जनैः ॥ यदि दुःखेपि संप्राप्ते करोति शिवपूजनं नरः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पिङ्ः खहानिः स्याद्वृत्तिश्चैवृद्धिरिशसदा ॥६०॥ अधुनावामहादेवंस्मरपस्मारनाशकं। स्मरस्मरशविलंबेनसांबंसंसारमोच
कं। संसारदृढमल्लानां विच्छेदः शंकरार्चनात्॥ महाफरसुरूपास्मोदन्यथा सकथंभवेत्॥ शिवनामाग्निनादग्धासंसारतरवः पुनः
नप्ररोहंतिसहस्रानिर्मूलास्तेयतस्ततः। विषसप्यमृतंनामशंकरकार्यभेदतः॥ पापमूर्तेविषमन्येपुण्यमूर्तेसुधापरं॥६४॥ दृढसंस
रपाशानांछेदनाय निर्वाचनें। दृढसंपन्निधानानांसंबंधायचजायते॥ तथाचपापनाशार्थंतत्संपत्संगमायच॥ कर्तव्यमतियत्ने
नलिंगेशंकरपूजनं॥६५॥ लिंगानिबहुधासंति भुक्तिमुक्तिप्रदान्यपि। तेषुसर्वेषुलिंगेषुनामेदंलिंगमुत्तमं। यद्दत्तंनामेदंलिंगेज
लंकुसुममेवच। फलंबिल्वदलंवापितद्दानंदौबुधिप्रदं। दुर्लभंनामेदंलिंगंदुर्लभाबिल्वमंजरी। दुर्लभाशांभवीविद्या दुर्ल
भः शंकरः कलौ॥६९॥ शंकरत्वंसमासाद्यरेवालिंगेमनोहरे। बिल्वाद्यैरर्चनं कृत्वामुक्तोभवतिमानवः॥७०॥ अन्यापिसंतिलि
गानिश्रीशैलेशंकरालये। पर्वताराधितंलिंगंत्रिपुरांतकसंज्ञितं। तल्लिंगपूजनादेवमुक्तःस्यादघसागरात्। तस्यदर्शनमात्रेणमु
क्तःस्यादघसागरात्॥ ईस त्रिपुरासुरसंहारंकृत्वाफालविलोचनः। लिंगाकारंसमासाद्य स्थितःश्रीपर्वतःखलु॥७३॥ भूमंडले
सुतीर्थानियानि तानिविशेषतः। श्रीशैलमूर्तिमासाद्यतिष्ठंत्येवनसंशयः। तल्लिंगार्चनजंपुण्यंसंपन्मुक्तिकरंपरं। तत्रयेनार्पितंद्र
व्यं तदनंतफलंमतं। दूर्वांकुरैर्बिल्वपत्रैर्नीरैर्वात्रिपुरांतकं। यः पूजयतिपुण्येनसमुक्तोभवतिध्रुवं। तत्रगोक्षीरकलशंयोदद्याद्भक्ति
पूर्वकं। शोभवायसपुण्यात्मासुधासागरराड्भवेत्। श्रीपर्वतेशोभवायर्ययोदद्यादन्नमादरात्। सतावदन्नराशीनांअधिपोभवति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स

ध्रुवं तत्र रत्नानि यो दद्यात्त्वा शिवपरायणः । रत्नकोशाधिपतिः भवत्येव न संशयः । त्रिपुरांतकमुद्दिश्य सुवर्णं यः प्रयच्छति
स सुवर्णपतिर्भूत्वा मुक्तो भवति मानवः । शिवचिंतनशीलश्चेद्भक्तश्चित्तमंततः । वित्तेशायातिपतितं यत्र निधनं रविसुतात् ॥८१॥
घंटाकर्णेश्वरं नाम लिंगमस्त्येकमुत्तमं । तत्पूजनेन पापानि विनश्यंति न संशयः । तत्रापि कुंडमस्त्येकं सुधाकुंडमिति श्रुतं । त
त्र स्नात्वा नरः सद्यः शुद्धो भवति सर्वथा ॥८२॥ तत्कुंडजलमध्यस्थो घंटाकर्णेश्वरं स्मरन् । सर्वपापविनाशानां हेतुरेव प्रजाय
ते । घंटाकर्णेश्वरं नत्वा संपूज्य कुसुमादिभिः । तत्पुण्यसंख्यया तत्र संपदा प्राप्नोति मानवः । सारंगेश्वरमालोक्य तत्र स्नात्वा तिष
वने । तत्सरोजलपानेन मुक्तो भवति मानवः ॥८३॥ पुण्यकोटिसमाक्रांतः शिखरेश्वरपूजने । करोति पुण्यकालेषु बिल्वदूर्वादि
भिर्मुदा । विभूतिकुंडमस्त्येकं तत्तु पावनपावनं । तस्मिन्कुंडे प्रविष्टानि तीर्थानि विमलान्यपि । तत्कुंडजलयोगेन तीर्थानां ती
र्थतामता । ततः सर्वाणि तीर्थानां तत्र यांति दिने दिने ॥८४॥ श्रीशैलाद्दुर्लभो लोके भस्मकुंडं च दुर्लभं । त्रिपुरांतकलिंगं च दुर्ल
भं जगतीतले । शिखरेश्वरमालोक्य विमुक्तः पापपंजरात् । पश्चान्मुक्तो भवत्येव यत्र कुत्रापि वा मृतः । तत्रास्ति हाटकेशाख्यं लिं
गं हाटकनिर्मितं । तत्रास्ति हाटकं कुंडं तज्जलं पापनाशकं । तत्र स्नात्वा प्रयत्नेन तल्लिंगं भक्तिपूर्वकं । बिल्वपत्रैः समभ्यर्च्य मुक्तो
भवति मानवः । श्रीशैले भ्रमरांबायाः कृत्वा दर्शनमादरात् । सर्वपापविनिर्मुक्तः संपन्नश्च भविष्यति ॥८५॥ भ्रमरांबापदांभोजं
कोमलैर्बिल्वपल्लवैः । समभ्यर्च्य प्रयत्नेन सर्वराष्ट्राधिपो भवेत् । भ्रमरांबां समभ्यर्च्य यः कराब्जेन दक्षिणे । करोति तत्करस्था

रामः
९१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्थास्यात्सर्वसंपद्वरांगना॥ ९६॥ तस्यस्यान्महदैश्वर्यसंततिस्तस्य वर्द्धते॥ यच्चिंतेन्ममरांबां पाचरणांबुरुहार्चनी॥ तस्यतावद्वि
पत्तिः स्यात् यावन्नाराधिता शिवा॥ आराधितायां तस्यां तु संपद्वृद्धिर्दिने दिने॥ तत्र संपत्प्रदानाय दीक्षिताम्ममरांबिका
तत्पादांबुरुहासक्तास्सर्वदा सर्वसंपदः संपत्करी निरिति ज्ञाता श्रीत्रैलोक्यममरांबिका॥ तस्याः प्रभावो वेदैर्वा न ज्ञातः सर्वथा
खलु॥ अलमलममिलापैरिंदुमौलिप्रसादात्सकलभुवननाथो जायते मानवोपि॥ इतिमनसि विचिंत्यानुग्रमुग्रं विदित्वा भ
ज भज भगवंतं पार्वतीकांतमेकं॥ ९७॥ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिवरहस्ये तृतीयांशे सुरनंदिसंवा
दे नाम द्वात्रिंशोध्यायः॥ ३२॥ ॥ शिवाय नमः॥ ॥ राजोवाच॥ प्रमत्तेन मया पूर्वं त्यक्तं शैवं पूजनं॥ तस्मादिनगतं भाग्यं न
पूजासाधनान्यपि॥ १॥ न पंचामृतसामग्री न वा नैवेद्यसाधनं॥ न दीपदानसामग्री न वा श्रीचंदनादिकं॥ २॥ एवं सति कथं प
जा कर्तव्या प्रीतिपूर्वकं॥ भावना कथमज्ञानां अपक्षा न करोति किं॥ करणं कथमेतेन विना किं करणं भवेत्॥ कथमज्ञ विमुक्ते
न करणं न कुलं फलं॥ ४॥ फलं संभावितं किं वा शुद्धगोदोहनादिना॥ किं प्रयोगप्रविष्टेन तेन गोदोहनेन वा॥ ५॥ किं सा नाम्येन
वादध्यो केवलाज्येन वा फलं॥ पत्यवेक्षितमेवाज्यं प्रयोगांगेन केवलं॥ ६॥ जांघनीवलिमेतस्याप्याज्यस्यांगत्वमीप्सितं॥ तता
स्त कथं मंत्रोपि करणापेक्षितः खलु॥ एवं च करणाभावे श्रीमहादेवपूजया॥ निष्पत्तिः फलजातस्य कथं मंत्रो विना तु ना॥ ८॥ इति त
द्वचनं श्रुत्वा नमाह प्रीतिपूर्वकं॥ संपत्काले कथं सक्तं त्वया शोकरपज्ञानं॥ संपद्विलयकालीनोप्यनुतापस्त्वयाधुना॥ कथं चिसुप्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सामग्रींसंपादयितुमर्हति॥१७॥ कथमन्नानि दिव्यानि कथं वा रत्नपर्वतः। स्थितास्ते शिवपूजायां न जाता भक्तिरुत्तमा। पुनर्भाग्ये
पि संप्राप्ते सा भक्तिर्नत्वया कथं। महादेवार्चने कार्यं विपत्कुलविनाशकं। आपत्काले यथा भक्तिः संपत्काले भवेत्तथा। सततस्यैव संस
राद्दिव्यसाधनपूजया॥१८॥ ते रत्नपर्वतानष्टा स्त्वया ये समुपार्जिताः। ततः कथं त्वया कार्यं रत्नैर्लिंगस्य पूजनं रत्नैर्नैकेन यः कुर्यात् श्रीमहा
देवपूजनं। स संपदाप्तिसंपन्नः कल्पांते पि भविष्यति। तानि रत्नानि दिव्यानि शंकरायार्पितान्यतः तेष्वन्नराशयो दुग्धाः शंकरायानिवे
दिताः। गोक्षीरघृतकुल्याश्च शंकरस्यार्पितास्ततः। शुष्का एव जलानां च कुल्याः शाल्याकुला इव। दुग्धं पुष्पवनं सर्वैर्ये पुष्पैः शिवपूज
नं भक्त्यान कृतमेवेति दग्धं च फलसंचयः॥१९॥ सभाग्य विभवो दग्धो भवनानर्वलंतरव। अतः किमनुतापेन फलमद्य भविष्यति॥१९
महाविभवसंपत्त्या श्रीमहादेवपूजनं। कर्तुं कथं महोत्साहो न कृतो दुर्मगाधम। धिग्धिग्जन्म तवेदं ते जीवनं धिग्धिगव्ययतत। शिवास
चेकजन्मानि स्थायर्तिके वलं। अतः परं वा यत्नेन नवदूर्वांकुरादिभिः त्रिपुरांतकपूजायां निरतो भव सत्वरं। इत्युक्तस्तं मुनिं नत्वा
त्वा तासरसि पावने दूर्वांकुरैः सरसिजैः पूजयामास शंकरं॥२१॥ एवं संवसतस्तस्य श्रीमहादेवपूजया। भूयानेव गतः कालः कालं
कालरूपं विना। उन्मनो यं महद्भाग्यं न दातुं क्षितिः उपा। न हन्तं भाग्यमीशेन कृतोपि शिवपूजने। अतिप्रमत्तभाग्यानि हृतान्येव
दिलीलया। स्वतंत्रेणा महेशेन प्रभुत्वं प्रकटी कृतं। अन्नाभावान्निराहारः स चिरं शिवपूजया। कालं नीत्वा स्थितस्तत्र त्रिपुरांतकं
दिर॥२०॥ ततः परं स राजा तु प्रदोषे सोमवासरे। आर्द्रानक्षत्रसंयुक्ते पूजयामास शंकरं। दूर्वांकुरैरपारैश्च कमलैरमलैर्जलैः। प्रणामे

॥ राम: ॥
॥ ९२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रपि नृत्यैश्च तोषयामास शंकरं ॥ २९ ॥ ततः परमहादेवः प्रसन्नः करुणानिधिः ॥ ददौ भाग्यान्यनंतानि तस्मै राज्ञे विशेषतः ॥ ततः स
राजा संप्राप्य भाग्यानि विविधान्यपि ॥ प्रहृष्टः शंकरं स्मृत्वा चकार शिवमंदिरं ॥ रत्नप्राकारसंयुक्तमनंतविभवं मुदा ॥ समर्पयामा कार
यामास दिव्यपुष्पवनान्यपि ॥ कोटिशो दीपमालाश्च रत्नपात्रेषु भक्तितः ॥ चकार धूपगिरयः कल्पितास्तेन वृद्धिषु ॥ ३३ ॥ अपाररत्ननिल
यः शंकराय समर्पिताः ॥ पंचामृतप्रवाहैश्च तोषितः परमेश्वरः ॥ ३४ ॥ दिव्यैः परिमलद्रव्यैः चारुचंदनकर्दमैः ॥ सुगंधकुसुमासारैः पूज
यामास शंकरं ॥ नैवेद्यपर्वतैरीशं तोषयामास भूपतिः ॥ नानाभोगैश्च विविधैः दुकूलाभरणादिभिः ॥ प्रदक्षिणैर्नमस्कारैः ललाटक
लकारयोः ॥ स्वेदधारापरिक्लांतश्चकार शिवतोषणं ॥ भोजिताः प्रत्यहं तेन कोटिशः शिवपुंगवाः ॥ दुकूलगिरयो दत्ताः तेभ्यः स्वभय
त्नतः ॥ ३५ ॥ सुवर्णरत्नगिरयस्तेभ्यो दत्ताश्च भक्तितः ॥ तद्देशवासिनः सर्वे कृतास्तेन च शंकराः ॥ शिवार्चनानुरागेण तेनाहारोऽपि विस्मि
तः ॥ न दारा दारहाराणां स्मरणं वा तस्य संगमः ॥ ६० ॥ विनश्वरमिदं भाग्यं अनेन यदि शंकरः ॥ पूजितः स्यात्तदा भाग्यं प्रवृद्धं च भविष्यति ॥
शिवपूजापरित्यागाद्दुःखभुक्तमनेकधा ॥ अतः परं वा यत्नेन कर्तव्यं शिवपूजनं ॥ ६१ ॥ येनान्नमेव न प्राप्तं मया तेनाधुना महत् भाग्यं
प्राप्तमिदं भाग्यं शंकराय समर्पितं ॥ ६२ ॥ शिवनैवेद्यमात्रेण कथंचिज्जीवनं सति ॥ अन्यद्भाग्यं महेशाय यद्दत्तं तच्च तेन मे ॥ ६४ ॥ अतः
परं कृपासिंधुः कुपितो न यथा तथा ॥ कर्तव्यमन्यथा दुःखं भविष्यत्येव पूर्ववत् ॥ यावज्जीवमयं धर्मो मम शंकरपूजनं ॥ अनेन कालेन
येन कालादृष्टेन मे भयं ॥ अस्यानुसारकालोऽयं शिवानुग्रहसाधनः ॥ भाग्ये चाप्रति मं तेन कर्तव्यं शिवपूजनं ॥ इति निश्चित्य बद्धध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सामग्रीं संपादयितुमर्हति ॥१५॥ कथमन्नानि दिव्यानि कथं वा रत्नपर्वताः । स्थितास्ते शीघ्रपूजायां न जाता भक्तिरुद्भुता । पुनर्भाग्ये
ऽपि संप्राप्ते सामग्री दैन्य त्वया कथं । महादेवार्चनं कार्यं विपत्कुल विनाशकं । आपत्काले यथा भक्तिः संपत्काले भवेत्तथा । सततस्यैव संसा
रादिव्यसाधनपूजया ॥१६॥ ते रत्नपर्वता नष्टास्त्वया ये समुपार्जिताः । ततः कथं त्वया कार्यं रत्नैर्लिंगस्य पूजनं । रत्नैर्नैकेन यः कुर्यात् श्रीमहा
देवपूजनं । स संपत्प्राप्तिसंपन्नः कल्पांते विभविष्यति । तानि रत्नानि दिव्यानि शंकराय न पितान्यतः । तेषन्नराशयो दुग्धाः शंकरायानिवे
दिताः । गोक्षीरघृतकुल्याश्च शंकरं नार्पितास्ततः । शुष्का एव जलानां च कुल्याः शल्याकुला इव । दृष्ट्वं पुष्पवनं सर्वैः पुष्पैरीशापूज
नं भक्त्या न कृतमचेति दुग्धं च फलसंचयः ॥१८॥ सभाग्यविभवो दग्धो भवता नार्चनेन तत्त्व । अतः किमस्तु तापनफलमद्य भविष्यति ॥१९
महाविभवसंपत्त्या श्रीमहादेवपूजनं । कर्तुं कथं महोत्साहे नष्टे ता दुर्भगाधम । धिग्धिग्जन्म तवेदं ते जीवनं धिग्धिगेव तत् । शिवार्च
चैकजन्मानि निःश्रेयसाय हि केवलं । अतः परं वा यत्नेन नवदूर्वांकुरादिभिः । त्रिपुरांतकपूजायां निरतो भव सत्वरं । इत्युक्त्वा स मुनिं नत्वा
स्नात्वा तासरसि पावने दूर्वांकुरैः सरसिजैः पूजयामास शंकरं ॥२०॥ एवं संवसतस्तस्य श्रीमहादेवपूजया । भूयानेव गतः कालः काल
कालरूपं विना । उन्मत्तो येन महद्भाग्यं न दृष्टं धर्मितीर्थया । नहत्वं भाग्यमीशेन कृतं च शिवपूजने । सति प्रमत्त भाग्यानि हृतान्येव
हि लीलया । स्वतंत्रेणा महेशेन प्रभुत्वं प्रकटीकृतं । अन्नाभावान्निराहारः स चिरं शिवपूजया । कालं नीत्वा स्थितस्तत्र त्रिपुरांतकर्म
हर ॥२१॥ ततः परं स राजा तु प्रदोषे सोमवासरे । आर्द्रानक्षत्रसंयुक्ते पूजयामास शंकरं । दूर्वांकुरैरपारैश्च कमलैरमलैर्जलैः प्रणामे

॥ रामः ॥
॥ ८२ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रपि नृत्यैश्च तोषयामास शंकरं ॥ ३२ ॥ ततः परमहादेवः प्रसन्नः करुणानिधिः ॥ ददौ भाग्यान्यनंतानि तस्मै राज्ञे विशेषतः ॥ ततः स
राजा संप्राप्य भाग्यानि विविधान्यपि ॥ प्रहृष्टः शंकरं स्मृत्वा चकार शिवमंदिरं ॥ रत्नप्राकारसंयुक्तमनंतविभवं मुदा ॥ सभं च कारयामास दिव्यपुष्पवनान्यपि ॥ कोटिशो दीपमालाश्च रत्नपात्रेषु भक्तितः ॥ चकार धूपगिरयः कल्पितास्तेन वर्षिषु ॥ ३३ ॥ अपाररत्ननिलयः शंकराय समर्पिताः ॥ पंचामृतप्रवाहैश्च तोषितः परमेश्वरः ॥ ३४ ॥ दिव्यैः परिमलद्रव्यैः चारुचंदनकर्दमैः ॥ सुगंधिकुसुमासारैः पूजयामास शंकरं ॥ नैवेद्यपर्वतैः शंतोषयामास पशुपतिं ॥ नाट्यगानैश्च विविधैः दुकूलाभरणादिभिः ॥ प्रदक्षिणैर्नमस्कारैः रुलाटिकैः रुकारयोः ॥ स्वेदधारापरिक्रांतश्चकार शिवतोषणं ॥ भोजितास्ते सहस्रेण कोटिशः शिवपुंगवाः ॥ दुकूलगिरयो दत्ताः तेभ्यश्च वसुमत्तः ॥ ३५ ॥ सुवर्णरत्नगिरयस्तेभ्यो दत्ताश्च भक्तितः ॥ तद्देशवासिनः सर्वे कृतास्तेन वशंकराः ॥ शिवार्चनानुरागेण तेनाहारोपि विस्मितः ॥ न दारा दारहाराणां स्मरणं वा तस्य संगमः ॥ ३६ ॥ विनश्वरमिदं भाग्यं अनेन यदि शंकरः ॥ पूजितस्यात्तदा भाग्यं प्रवृद्धं च भविष्यति ॥ शिवपूजापरित्यागात् दुःखभुक्तमनेकधा ॥ अतः परं वा यत्नेन कर्तव्यं शिवपूजनं ॥ ३७ ॥ येनान्नमपि न प्राप्तं मया तेनाधुना महत् भाग्यं प्राप्तमिदं भाग्यं शंकराय समर्पितं ॥ ३८ ॥ शिवनैवेद्यमात्रेण कथं चिज्जीवनं सति ॥ अन्यद्भाग्यं महेशाय यद्देयं दत्तं च तेन मे ॥ ३९ ॥ अतः परं कृपासिंधुः कुपितो न यथा तथा ॥ कर्तव्यमन्यथा दुःखं भविष्यत्येव पूर्ववत् ॥ यावज्जीवमयं धर्मो मम शंकरपूजनं ॥ अनेन कालेन येनकालादृपि न मे भयं ॥ अस्यानुसारकालोयं शिवानुग्रहसाधनः ॥ भाग्येचापि तिमंतेन कर्तव्यं शिवपूजनं ॥ इति निश्चित्य बद्धुध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सच्चकारशिवार्चनं । तेनतुण्यप्रभावेनसंपद्वाप्यभूत्सदा । तस्यपुत्राःशतंतेपिवीराःशांकरपुंगवाः । तेश्चपूजांकृतानित्यंरत्नादि
भिरुमापते । रत्नैरेवमहेशायमंदिराणिकृतान्यपि । शिवपूजाप्रसन्नार्थंवनान्यपिकृतानितैः । विरताएवसहसासंसारेदुरितक
र । भाग्येपिविरताःसर्वेशंकराराधनोत्सुकाः । पुष्पाणिस्वयमानीयबिल्वपत्राणिकोटिशः । अर्पितानिमहादेवैर्नीतःकालश्चतैः
स्त्वया । शोभदायैवतेसर्वेशिवपूजापरायणाः । नारायणादिवृंदारंवृंदवंदितपादुकाः । कृत्वाशिवार्चनंनित्यंविहारार्थंचरंतिते स्व
र्गलोकेब्रह्मलोकेविष्णुलोकेनिजेछया । उन्नताश्वांसमारुह्यतेयांतिस्वर्गमंदिरं । गजानपिसमारुह्यकदाचिद्दतिशांभवाः । शिव
पूजाप्रभावेणतेपिसर्वेपिशांभवाः । अविघ्नगमनाएवब्रह्मलोकेपिसंततं । कदाचिदागतांदृष्ट्वाशांभवांस्तांश्चतुर्मुखः । अभ्युत्था रामः
नादिभिःसम्यक्पूजयामाससादरं । ततस्संपृष्टस्तत्रतैनतत्स्वरूपंकिमित्यपि । ततस्तान्विस्मयेनाहतत्सितामहवर्तनं ॥५८॥ ततसित ९२
महःपर्वतकूटेपुस्थितःपुरा । सभिक्षुस्तेनतद्दृष्टोशिवमंदिरपालकः । तद्द्वारेश्वानहाहारोनीयतेतत्रनित्यशः । सतत्रस्सुद्धजंतून्नाकरोत्से
वनिवारणं ॥६०॥ यथानस्सुद्धजंतूनांप्रवेशःशिवमंदिरे । तथाकरोलियत्तेननियुक्तःश्वानचिन्मुडः । तद्द्वातन्मंदिरद्वारिबलिदानान्नमाद
रात् । गृहीत्वाभुंभुजेभिक्षुःस्वदारैस्सहभक्तितः । तदन्नपरिपाकेनसपुण्योरतिनस्मरः । ततोदधारतत्पत्नीगर्भंसौभाग्यसंयुतं । तन
स्तस्याभवत्पुत्राःरूपलावण्यसंयुताः । ततस्तद्देशराजार्पितंहर्षकेदाचन ॥६४॥ ततःपरंविनाशोयंराजापुत्रविवर्जितः । तस्मैराज्यंददौ
पश्चात्सम्मतोभूपतिर्बुधाः । तेनेनशिवनैवेद्यंच्चलिभोजनमुपयतः । तदन्नपरिपाकेनतद्धर्मज्ञानसंयुतः ॥६५॥ भुक्तंमहेशनैवेद्यंजनक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्यां मम मादृशात् ॥ तदन्नरसपुष्टाच्च गर्भेन तनुरियं मम ॥ तदन्नरसपुष्टाभ्यां गर्भे संपादिता प्रिये ॥ मम भाग्यस्य नांतोऽस्ति शिवनैवेद्य भो
जनं ॥ ६९ ॥ कियोऽस्तद्रसपुष्टाभ्यां गर्भे संपादनं कृतं ॥ तदन्नरसधारायाः संबंधेन ममाधुना ॥ शरीरं पावनं धन्यं जीवनं च ममाधुना ॥
राज्याधिपत्यं संप्राप्य कर्तव्यं शिवपूजनं ॥ ७० ॥ शिवनैवेद्यसंबंधात् भूपतिर्जायते पुमान् ॥ दुर्लभं शिवनैवेद्यं सुराणामपि तद्यतः ॥ दुर्ल
भं प्राप्यते तावत् तदीशानुग्रहात्परं ॥ इति संचिंत्य संचिंत्य सोऽपि गर्भाद्विनिर्गतः ॥ ततः स राज्यं संप्राप्य यौवनं प्राप्य दुर्मदः ॥ न शिवारा
धनोद्योगं चकार कुमतिर्बुधाः ॥ उदार धीर धीरांगसंगात्संगोऽपि विस्मृतेः ॥ रत्नप्रासादमारुह्य क्रीडायां निरतो मुहुः ॥ तादृशोन्माद
समये विस्मृते शिवपूजने तस्य राज्यं गतं सर्वं सौभाग्यं च गतं तथा ॥ ७५ ॥ ततः श्रीशैलनाथस्य सेवया राज्यमाप सः ॥ ततः परं महादेवं
पूजयामास सादरं ॥ तत्पूजनेन संप्राप्तं भाग्यं पूर्वाधिकं बुधाः ॥ तस्य भाग्यस्य नांतोऽभूत्तेन भाग्येन शंकरं ॥ पूजयामास विविधैः उपचा
रैरनेकधा ॥ तस्य पुत्राः किलेयतेऽपि सर्वदा शंकरार्चकाः ॥ एते च रत्ननिलयाः शंकरायार्पितास्तथा ॥ यथा तुष्टो महादेवः रत्नसुंदरमंदिरैः
७९ ॥ वनानि कानि तान्येतेस्तेषु पुष्पाणि सततं ॥ तैः पुष्पैः पूजयंत्येते महादेवं प्रयत्नतः ॥ ८० ॥ महादेवप्रसादेन राज्यवृद्धिः प्रजायते ॥ तद्रा
ज्यधनमादाय शिवपूजां करोति सः ॥ शिवपूजनसामर्थ्यमनंतैश्वर्यदं बुधाः ॥ ८१ ॥ तदैश्वर्यस्य नांतोऽस्ति तद्भक्तानां च वस्तुतः ॥ ८२ ॥ शिव
चिंतनशीलश्चेदमृतं चित्तमंततः ॥ वित्तेशो याति पत्नित्वं पत्निपत्तरविः सुतः ॥ निवासो मत्तमातंगकोटीनां शांभवालयः ॥ उच्चैश्रवणाभा
येन शिवनाम्नः फलं हि तत् ॥ तुरंगाणां च तुंगानां कोट्यः शांभवालये ॥ तदुच्चैः शिवपूजायाः फलमित्यवधारितं ॥ गोयूथानां च नि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सभाग्यलं च निर्णीतं केवलं शिवपूजया ॥

लयः शोभवस्यालयः खलु ॥ गिरिशाराधनस्यैव फलं तदिति निश्चितं ॥ यद्यन्नद्भाग्यं सभाग्यानां तत्तत्सर्वं शिवपूजया ८७ किं
चानुषंगिकमिदं फलमित्यवेमि भाग्यं समस्तधनधान्यसमृद्धिरूपं ॥ सत्यादिलोकवसतिश्च शिवार्चनस्य मन्ये फलं किमपि तच्छि
वएव वेद ॥ ८८ सुखस्य सर्पिषि किं फलं नेतरत् किंचित्फलं जायते धान्यादी ह्यलं धान्यचनफलं ग्रामांगसंगात्मके ॥ मुख्यो सत्सवित
स्फलं खलु तथा महल्लोकवासः फलं कैलासान्वयमिच्छतामपि तत आतनत्कं लक्ष्यते ८९ ॥ ॥ इतिश्रीस्कांदे महापुराणे हिमव
त्खंडे शिवरहस्ये तृतीयांशे सुरनंदिकेश्वरसंवादे नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥ ॥ श्रीशिवार्पणमस्तु ॥ ॥ श्रीनंदिकेश्वर उवाच
इतिभाग्यवचः श्रुत्वा नत्वा भाग्याधिदेवतान् ॥ सन्निधानं तवाजस्रं सेवयातल्लये वमे ॥ महेश्वरालयप्राप्तात्मया मत्संनिधिः ख
लु ॥ एतावता सभाग्याहमितः किमधिकं फलं ॥ २ आराधनं च भवति करोमि भगवानपि ॥ संतुष्टो येन भगवान्सौभाग्यं स्थिरतामि
यात् ॥ ३ इत्युक्ता सापि संतुष्टा भोगागारं समाहृतः ॥ शिवार्चनपरा नित्यं शिवनामरता भवत् ॥ ४ तेनाप्युल्लतमुत्कृष्टं कारितं रत्नमं
दिरं ॥ तस्य नार्मदलिंगस्य सर्वाभरणभूषितं ॥ मणिमालासमाकीर्णं रत्नप्राकारसंयुतं ॥ स्वर्णचामरकुम्भाभिश्चक्रे लिंगाभिषेच
नं ॥ ६ दिव्यनीरप्रवाहैश्च शीतलैर्गंधसंयुतैः ॥ कस्तूरीघनसारादिनानाद्रव्यसमन्वितैः ॥ चंदनं च घनीभूतं दिव्यगंधसमन्वितं दत्त
मीशाय तेनैव वरस्तैरभ्यर्चितः शिवः ॥ ८ गोघृतेन वर्तिनैव दीपमालाः कृताः खलु ॥ ताभिः प्रभान्वितं जातं सर्वं ब्रह्मांडमंडलं ॥ विल्व
मंदारकुसुमैः कमलैरमलैरपि ॥ अन्यैश्च विविधैः पुष्पैः गंधसारसमन्वितैः ॥ १० ॥ सुवर्णपुष्पमालाभिः नानारत्नसमन्वितैः मुक्ता

रामः
५४

२१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

हारैरविरलैर्नीलमालाभिरादरात्। बिल्वपल्लवमालाभिरमलाभिर्विशेषतः॥ अतुल्याभिरमूल्याभिः पूजयामास शंकरं॥१३॥ नाना
विधैर्धूपधूमैर्धूपयित्वा सदाशिवं। नैवेद्यं कल्पयामास सन्नानैर्विविधैरपि॥ परमान्नप्रवाहैश्च शर्कराज्यसमन्वितैः। वटकाद्यैर्भक्ष्यैर
घृतपूरैर्मधुरैरपि॥१४॥ नारिकेलजलानां च प्रवाहैः शीतलैर्जलैः॥ एलालवंगसंयुक्तैस्तांबूलै रमलैरपि॥१५॥ रत्नछत्रैश्चामरैश्च दुकू
लैर्दर्पणैरपि॥ प्रणामैरपि नाट्यैश्च तोषयामास शंकरं॥१६॥ दिव्यान्नैः शिवनैवेद्यैस्तोषयामास कोटिशः॥ शांभवांश्च सदानेन ददौ वस्त्र
धनान्यपि। गोसहस्राणि दत्तानि शैवेभ्यस्तेन सादरं। विविधान्यपि धान्यानि तेभ्यो दत्तानि तेन तु॥ प्रत्यहं हृष्ट या भक्त्या पूजामेवंविधा
यसः। आसायमुपवासेन निशि भुंक्ते शिवार्चकः॥१९॥ एवं संवसतस्तस्य दृष्टुं सर्वे शिवोत्सवं। सनकाद्यैः सहानेते मुनिभिर्नारद
यो॥२०॥ सदूरेणैव तान् दृष्ट्वा भस्मोद्धूलितविग्रहान्॥ रुद्राक्षमालाभरणान् दृष्टः सादरमास्तिकः॥ तानागतान् प्रयत्नेन नत्वा
भक्तिपुरस्सरं॥ पूजां विधाय विहितां रत्नसिंहासनस्थितान्॥२२॥ स्वयं च भस्मनोद्धूल्य सर्वांगान्यपि भक्तितः। रुद्राक्षमालाभरणः
पप्रच्छ शिववैभवं॥ महेश्वराराधनस्य प्रकारः कः परश्शुतः। किं तत्फलं चाधिकारी को वा तन्मे वदंतु च॥२४॥ इति तद्वचनं श्रुत्वा नार
दो भक्तिपूर्वकं॥ नत्वा महेश्वरं प्राह शिवधर्मान् विशेषतः॥२५॥ नारद उवाच॥ संति धर्माः श्रुतिप्रोक्ताः कोटिशस्तैरलं खलु
आयाससमाप्यफलैकैस्त्वल्पफलैकैरपि॥२६॥ धर्मैरपारैर्विविधैर्यस्फलं लभ्यते जनैः॥ तदेशार्चनसंप्राप्यं लीलयैव न संशयः॥ न
बहुद्रव्यविलयो नायासः शिवार्चने। प्राप्यंते विमलान्येव विफलानि फलान्यपि। बिल्वपल्लवमात्रस्य प्रदाने लिंगमस्तके। यत्फल

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नाप्यतेतत्तुनर्यमांतरकोटिभिः ॥ लिंगसृष्टिः कृताभूर्वैकरूपासागरेपाहि ॥ त्रिशूलपाणिनासेयंउत्कृष्टास्वष्टिरद्भुता ॥ ३० ॥ पुंडरी
कः ॥ पुराकैलासभुवनेसुखासीनंमहेश्वरं ॥ हिरण्यवलाकुर्मीशानंस्वर्णसुंदरविग्रहं ॥ ३१ ॥ शरद्राकेश्वराकारदुकूलपरिवेष्टितं ॥ उ
दारहारतारायांविहारनिकरंपरं ॥ जटाजूटतटिल्लूटनिकटेंदुकलाधरं ॥ रत्नाभरणशोभाभिरभितःपरिवेष्टितं ॥ त्रिलोचनंनी
लकंठंसोल्लकंठंगिरिजाननं ॥ अप्रमेयमनाद्यंतंसच्चिदानंदलक्षणं ॥ परमानंदसंदोहंमंगलानांचमंगलं ॥ पवित्राणांपवित्रंचदेवतानां
चदेवतं ॥ अप्रधृष्यमभवंभीमंजरामरणवर्जितं ॥ महामृत्युंजयं२शर्वंमहारुद्रंपिनाकिनं ॥ ३६ ॥ भक्तानंदप्रदंभव्यंदिव्यवेषविभूषितं
स्मरणेनापिभक्तानांसर्वाभीष्टप्रदायकं ॥ गौरीविहारनिरतंप्रसन्नवदनंप्रभुं ॥ शंभुंविलोक्यगिरिजाप्राहतद्वामभागगा ॥ ३८ ॥
श्रीगौर्युवाच ॥ भगवन्भवदेवेश त्वंसर्वेशशिरोमणिः ॥ प्रष्टव्यमेकमधुनादययातद्वदाधुना ॥ केनसिद्धिर्भवेन्नॄणांमुक्तिश्चपरमे
श्वर ॥ इष्टलाभोपिसततंतद्वदादरपूर्वकं ॥ ४० ॥ नचावगण्यनाकार्यानावहेलनखेलना ॥ नान्यत्रचित्तविश्रामःकर्त्तव्यःश्रमवर्जितः रामः ९५
४१ ॥ इतितद्वचनंश्रुत्वाप्राहगौरीमनोहरं ॥ वचनंश्रुतितत्वज्ञस्तत्रादरपुरस्सरं ॥ ४२ ॥ ॥ श्रीसदाशिवउवाच ॥ इष्टसाधनम
स्येकंगोपनीयंप्रयत्नतः ॥ तद्देवतावदधुनावक्तव्यंश्रुतिचोदितं ॥ ४३ ॥ लिंगेनस्थापितैर्मंत्रैःलिंगमुक्तंममाम्बिके ॥ नमःपदांतैर्मंत्रै
स्तैःपूजाप्रयुक्ताविशेषतः ॥ ४४ ॥ ममैवपूजाविहितातेशहोतदनंतरं ॥ लिंगपूजापिविहितासापूजासुलभायतः ॥ ४५ ॥ मत्स्वरूपपरिह
नमशक्यमितिनिश्चयात् ॥ नल्लिंगपूजनेताबहुकेलोकोपकारकं ॥ ४६ ॥ मल्लिंगपूजनंतावद्यावज्जीवंविशेषतः ॥ कर्त्तव्यमतियत्नेन

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

शुचिर्भूतेन भस्मना॥ ४७॥ यावज्जीवाः श्रुतिसायमग्निहोत्रादि कर्मणां॥ शिवलिंगार्चनस्यापि न समाना विशेषतः॥ सायंप्रातः श्रु
तिस्तत्र भिन्ना कालनियामिका॥ अनुपास्य मंत्रांगं कालोपास्य वधारितः तथा च विधिशक्तिश्च कालमादाय केवलं॥ तत्र पर्यवसं
नेव सायंप्रातरिति श्रुतेः॥ ४८॥ प्रकृते लिंगपूजायां श्रुतिः कालनियामिका॥ नास्तीति सर्वदा कार्यो सौख्यमुख्यत्वप्रमिता॥ पानमुख्य
स्य यस्यास्यासं कोचाय श्रुतिस्तथा॥ असंकुचितरूपायं प्रत्ययस्वार्थबोधकः॥ ४९॥ विहितात्प्रत्ययेनेयं शिवपूजनभावना॥ तया भावन ८७॥
या तावत्करणं पूजनं मितो तत्राधिकरणं किंवा तद्बोधकसप्तमी॥ अधिकारीव कस्तस्मिन्कथं मंत्रो पिचिंतितः॥ ५०॥ शिवलिंगे बि पृ ७ क
ल्वपत्रैः पवित्रैः स्वार्जितैरिति॥ श्रुतिप्रोक्ता भावनापि पूर्णा शास्त्रसमर्थितैव॥ श्रुतिर्यथास्ति सर्वेभ्यः कामेभ्य इति तत्र सा॥ दर्शादौ त
ह्रत्रापि कामश्रुतिरविच्युता॥ ५१॥ फलसाधनभूतत्वात्करणं शिवपूजनं॥ शिवार्चनेन लभ्यंते सर्वे कामा इति श्रुतेः॥ ५२॥ इयं शिवार्चने
नेति तृतीया करणंपरं॥ शिवपूजनमेवेति शक्या बोधयति स्वयं॥ तस्याः शक्तिस्तु नान्यत्र भ्रामित्पस्यैव निश्चिता॥ करणे शक्तिरेवं
तदेव करणं स्मृतं॥ ५३॥ यज्जुहोति तदित्यादि श्रुतिराय तनेन तथा॥ शक्तानत्रैव प्रकृते लिंगे कुर्यादिति श्रुतिः॥ ५४॥ तथा च सप्तमी से यं
लिंगमायतनंपरो॥ इयं शिवार्चनस्येति तत्र शक्ता वदत्यपि॥ फलकामोधिकारीति ज्योतिष्टोमविनिश्चयात्॥ प्रकृतेप्यधिकारी तु फ
लकाम इति श्रुतेः॥ ५५॥ गुणोत्तरान्वेषणाय प्रवृत्तासापि भावना॥ बिल्वपत्रैरिति श्रुत्या तान्निजप्रहसादरं॥ स्वानितान्येव तानीति सं
स्कारापेक्षयापि सा॥ स्वानीतत्वाख्यसंस्कारे सा गृह्णीयात्स्वयं सादरं॥ ५६॥ पत्त्यवेक्षितमित्यत्र संस्कारः पत्त्यवेक्षणं॥ स्वानीतत्वं च संस्कारा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

बिल्वपत्रेषु निश्चितः प्रयोगे प्रथमता तत्संस्कारो यमिति श्रुतः ॥ आज्यवन्न द्वितीयादि प्रयोगे नियमस्तेन ॥ ६६ ॥ आधानं भावनानां च
कर्तुरूपावगाहिनी ॥ अनंधकर्तृसापेक्षा प्रयोगे प्रथमे मिता ॥ द्वितीयादि प्रयोगेषु देवादर्धत्वसंभवे ॥ आज्यावेक्षणसंस्कारलोपं गृण्हा
ति भावना ॥ ६८ ॥ एवं शिवार्चने याद्येस्वानीतत्त्वावगाहिनी ॥ प्रयोगे भावनातत्त्वं द्वितीयेनावगाहते ॥ यदि कर्तास्वयं दक्षस्तस्यात्रेनय
नस्पृहा ॥ तद्गृण्हातीति नियमो न द्वितीयादिषु ध्रुवं ॥ ७० ॥ नंधगुरस्यधिकृतः प्रयोगे प्रथमे यतः ॥ प्रदक्षिणं क्रमयानकृपहा सत्रापि भावना
एवं चाद्य प्रयोगेपि विशेषवचनैः परं ॥ पंगवादीनपि गृण्हाति शिवपूजन भावना ॥ ७२ ॥ सामाभावेतु पूतीकानू विशेषवचनेन सा ॥ गृण्हाति
भावना तद्वद्द्रव्य गृण्हाति भावना ॥ आद्य प्रयोगे गृण्हाति बिल्वपत्राणि भावना ॥ तदभावे तु तत्तुल्यं पत्रं गृण्हाति भावना ॥ अंगानि बहू
न्येव श्रुतानि विविधान्यपि ॥ नित्यं च मस्य तत्किंचिदंगमास्ति शिवार्चने ॥ ७४ ॥ गोदोहनादितुल्यानि काम्यांगान्यपि कानिचित् ॥ तानि नित्यां
गलोपाय प्रवृत्तानि कथंचन ॥ गोदोहन प्रयोगे किंच मर्स्यांगलाभतः ॥ एवं नित्योगलोपेपि प्रयोगस्या विशेषतः ॥ ७७ ॥ भस्म त्रिपुंडुक
रणं संनिपत्योपकारकं ॥ शिवलिंगं च रुद्राक्षधारणं च श्रुतिः श्रुतं ॥ नवनीताभ्यंजनादितुल्यं भस्मादि धारणं ॥ तस्यप्रतिनिधिर्नेति
तत्प्रयोगो व्यपेक्षते ॥ कर्मांगत्वेन विज्ञातं भस्मधारणमित्यतः ॥ तत्यागे नाधिकारी स्यात्स्मार्ते वा वैदिके पि वा ॥ ८० ॥ शिवमंत्रजपे योग्य
भस्मधारी न चेतरः ॥ धृतभस्मनि गायत्री गुरुणाप्युपदिश्यते ॥ अग्निकार्ये पासंपन्ने पूर्वं भस्मन्यतः परं ॥ धृतभस्मनि गायत्रीजपयोग्य
प्रजायते ॥ ८२ ॥ गायत्री शिवमंत्रत्वाभस्मधारणभावना ॥ मां गृण्हात्विति पर्यंतो तद्गृहीताधितिष्ठति ॥ ८३ ॥ रुद्राक्षधारणं तद्वच्छिवार्च

राम:
९६

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नभावनी॥ स्वानुग्रहार्थं पश्यंती भावनां प्रचलिष्यति॥८५॥ पूर्वांगाप्युत्तरांगाणि तानि तावत्स्वरूपतः॥ महापर्वोपयुक्तानि स्वापवे
ह्यारसंभवात्॥ तदपूर्वं फलं यावत् तावद्देवाधितिष्ठति॥ फले जाते न तस्यापि कृत्यमित्यवधारितं॥८६॥ सर्वेभ्य एव कामेभ्यः शिवपू
जनमित्यपि॥ प्रयोगभेदमाश्रित्य तद्भावेन तन्मतं॥८७॥ नह्येकेन प्रयोगेण फलानि विविधान्यपि॥ अतोर्थवाद एवायं नानाविध
फलश्रुतिः॥८८॥ आवृत्तिश्च प्रयोगाणां बहूनि विविधान्यपि॥ फलानि विविधान्येव भविष्यंतीति निश्चयः॥८९॥ नाधिनी वह्निलक्ष्मी
अन्यच्चार्चनसाधनं॥ भवस्य तल्लोकिकं च तदंगमिति निश्चितं॥९०॥ तत्सर्वांगोपसंहारं सर्वथा फलभावना॥ स्वोपक्षिप्तगृहीत्वैवसं
पूर्णाफलमिच्छति॥ शुचितत्कालजीविद्वन्निष्ठालस्यादिवर्जने॥ गृपहातिभावना तावत्तदंगमिति निश्चयात्॥९१॥ विश्वासोयं गमेव
त्र शिवपूजनबोधकः॥ नाक्यतदर्थवादपि प्ररोचक इति स्मृतं॥९२॥ शिवार्चने पि वेदस्यावेदश्च नियमात्तयोः॥ नेदंगत्वमिति ज्ञातं भावना
नुगृहीतयोः॥ शिवपूजोपकरणं भस्मसंस्कृतमप्यसत्॥ गृहीतस्सोपि संस्कारस्तथा भावनया हितः॥९३॥ अखंडभावनायं यं प्रयो
गस्य विशेषतः॥ भावनांतरसंपन्नात् तदंगावगाहनात्॥९४॥ तत्प्रयोगबहिर्भूतान्यंगानि विविधान्यपि॥ गृपहातिभावना सैव बृह
स्पतिसवे यथा॥ तथा च शिवपूजायां लिंगमाहवनीयवत्॥ जलादिवच्छांभवोपि पूजातिकरणं क्वचित्॥९५॥ लिंगान्यपि विचित्राणि
नार्मदादीनि कानि चित्॥ तेषु पूजा विशेषेण नमःलायोपकल्पते॥ रेवाजलेन रेवायां रेवातीरसमुद्भवैः॥ दूर्वांकुरैर्वा संपूज्य मुक्तो भ
वति मानवः॥९६॥ रेवातीरसमुत्पन्नाः कररोपि महावने॥ लिंगरूपास्ततस्तेषु पूजनं मुक्तिमुक्तिदं॥९७॥ लिंगानि संति यावंति त्रैलोक्ये वरव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नि॥ तानिसर्वाणिलिंगानिममप्रियकराणिहि॥ १२ मद्भक्तोयत्रयत्रत्वामामध्यानंकरिष्यति॥ तदेवलिंगंमद्रूपंअन्यंलिंगंन
सर्वथा॥ मंत्रेरचिष्ठितद्रव्येपूजातावद्विधीयते॥ अधिष्ठानंदेवतायाःपवित्रंमंत्रसाधितं॥ तथाचसिद्धलिंगानिनामंदाहीनिके
वलं॥ तत्रप्रतिष्ठाविधयःप्रसरंतिनसर्वथा॥ सिद्धक्षेत्रापियावंतितत्रलिंगानियानिच॥ तत्रप्रतिष्ठाविधयःप्रसरंतिनसर्वथा
१०५॥ सिद्धक्षेत्रोत्तमंकाशीतत्रलिंगानियानितु॥ तानिलिंगानिसर्वाणिसिद्धानीत्यवगम्यतां॥ रवायांयानिलिंगानितानिलिंगानि
शैलजे॥ सिद्धलिंगानिसर्वाणितानिपूज्यानिसर्वदा॥ त्र्यंबकाख्यंयल्लिंगंगोहामृतंमनोहरं॥ तत्सिद्धलिंगंतल्लजा भुक्तिमुक्ति
प्रदायिनी॥ अहोबलाभिधंलिंगंसिद्धलिंगमितिश्रुतं॥ कोटिशंकरसंज्ञंचसिद्धलिंगमितिश्रुतं॥ १० तीर्थेशालिंगमप्येकंसिद्ध
लिंगमितिस्मृतं॥ संगमेश्वरलिंगंचसिद्धलिंगमितिस्मृतं॥ श्रीशैलेयानिलिंगानितानिलिंगानिशैलजे॥ सिद्धलिंगानिसर्वाणिनत्र ॥रामः॥
जासर्वसिद्धिदा॥ अशीतियोजनायामःश्रीशैलःकमलानने॥ सतुलिंगमयःसर्वःसर्वतीर्थमयोपिसः॥ १२ शिलादेनतपस्तप्तंगिरि ॥९८॥
वंगंगातटेशिवे॥ तदुग्रतपसासर्वंसकंपमभवन्नीतलं॥ १४ देवाःसर्वेसकंपाश्चमुनयश्चारवाञपि॥ तादृशेनाग्रतपसातुष्टोस्मिक
मलानने॥ ततःप्रत्यक्षतांप्राप्तःप्रीतस्तत्तपसाशिवे॥ मयिप्रसन्नेदेवेशयाचस्ववरंवरं॥ १६ शिलादउवाच॥ नमोनमस्तेगिरिजास
हायनमोनमस्तेसुकृतस्वरूप॥ नमोनमस्तेनतपतेमहेश्वरानमोनमस्तेस्तुनमोनमस्ते॥ १७ त्वत्पादांबुजभक्तिर्मेनिश्चलाभवतिप्रभो
त्वमेवशरणंशंभोगतिस्त्वंजगतांप्रभो॥ कर्मोपयस्यफलोन्मुखानिभगवन्त्वत्साध्यंदर्पसंयतोहृद्दोषविवर्जितंसुखयुतंतावत्करे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

६॥ मूरीशशंभिभवंतीर्गानिरभ्याणिमेप्रभो। ज्येष्ठ्यंचमाधिपत्यंचमन्युर्भावश्चमेप्रभो॥ अमश्चांभश्चजेमाच महिमा
वरिमाचमे॥ ६

तिस्वतः। तन्नावस्तुनिर्दंदमानसमनःपद्मप्रतिष्ठप्रभो तन्मन्मानसपंकजेस्वपामपि स्वामिन्मुदेजायतां॥ २९॥ वाजश्चमे
स्तुप्रसवश्चमेस्तु त्वसजयासाप्रयतिश्चमेस्तु। मेहश्चराशुप्रमितिश्चमेस्तु धीतिश्चमेस्तु क्रतुरस्तुशंभो॥ ६०॥ स्वरश्चमे
स्तुस्वरदेशशंभोश्लोकश्चमेस्तुश्रुतिगीतकीर्ते॥ श्रावश्चमेस्तुश्रुतिरस्तुशंभो त्रिवाभिधानश्चवपायनिसं॥ २१ ज्योतिश्च
मेस्तुज्वलनस्वरूपसुवश्चमेस्तु त्रिपुरासुरारे। प्राणश्चमेतावदपानयुक्तो व्यानश्चमेसुश्चतथैववित्तं॥ आधीतंचतथावाक्च
मनश्चचक्षुश्चमेप्रभो॥ श्रोत्रंदक्षोबलंचौजःसहश्चायुश्चमेप्रभो॥ जराचात्माचमेशंभोतनूःशर्मचवर्मच॥ अंगान्यस्थीनिम
गवंनूपरूंषिचभवंतुमे॥ प्रथिमाचास्तुगौरिशचव्माचेद्राघुयाचमे॥ २२॥ वृद्धंवृद्धिश्चसत्यंचश्रद्धाचास्तुजगच्चमे॥ धनंवश
स्त्विषिश्चास्तुक्रीडामोदश्चमेप्रभो॥ जातंजनिष्यमाणंचसूक्तंमेसुकृतंचमे॥ वित्तंवेद्यंचभूतंचभविष्यंवसुगंचमे॥ २८॥ सु
पथ्यंऋद्धमृद्धिश्चक्लृप्तंक्लृप्तिश्चमेमति॥ सुमतिःशंमयश्चास्तु प्रियंचास्तु शिवाप्रभुमे॥ २९॥ अनुकामश्चकामश्चशंभोसौमन
सश्चमे॥ भद्रंश्रेयश्चवस्यश्चयशोमेस्तुभगश्चमे॥ ३०॥ द्रविणंचास्तुयंताचधर्ताक्षेमश्चमेधृतिः॥ विश्वंमहःश्चसंविच्चज्ञात्रंसश्च
प्रसूश्चमे॥ सीरंलयोऋतंचास्तुभगवन्नमृतंचमे॥ अयक्ष्मंचानामयश्चजीवातुश्चास्तुमेसदा॥ ३२॥ दीर्घायुत्वानमित्रंचसर्वदाप्य
भयंचमे॥ सुगंचशयनंमेषासुदिनंचास्तुमेसदा॥ ३३॥ ऊर्क्चमेसूनृताचास्तुपयश्चास्तुरसश्चमे॥ घृतंमधुचसग्धिश्चसपीति
श्चकृषिश्चमे॥ ३४॥ वृष्टिश्चजैत्रमौद्भिद्यंरयिश्चास्तुसदापिमे॥ रायःपुष्टंचपुष्टिश्चविभुचप्रभुचप्रभो॥ बहूभूयश्चपूर्णंचतथाप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्मरतंचमे ॥ असितिश्चास्तु भगवंन् कृयवाश्च मसंतुमे ॥ ४६ ॥ ऊर्जा न मयुतोमे स्तोतना स्तु सुश्चमेप्रभो ॥ व्रीहयश्च यवामाषास्तिलामु
द्गाश्चमे शिव ॥ खल्वाश्चसंतुगोधूमामसुराश्च प्रियंगवः ॥ अणवः संतुमेनित्यश्यामाकाः संतुमेप्रभो ॥ ४७ ॥ नीवाराद्याश्चमे संतुगृहे
सर्वांगनायकाः ॥ अश्माचमृत्तिकाचास्तु गिरयः पर्वताश्चमे ॥ सिकतास्संतु भगवन्मे वनस्पतयश्चमे ॥ हिरण्यमस्त्वयश्चास्तु तथा
सीसंत्रपुश्चमे ॥ ४८ ॥ श्यामंलोहंश्चमेग्निश्च गृहे तिष्ठतु सर्वदा ॥ आपश्च वीरुधस्संतु तथैवौषधयो निमे ॥ ४९ ॥ कृष्टपच्यंचबहुधा ममाति
ष्ठतुवरमनि ॥ नत्थैवाकृष्टपच्यं चवनसंभवमस्तुमे ॥ ५० ॥ ग्रामहिष्या हृयोग्राम्याः पशवः संतुमेगृहे ॥ सहायेहेनकलंतो आरण्याः पशवु
श्चमे ॥ वित्तं वित्तिश्चमतिश्चभूतिश्चवसतिर्वसु ॥ शिवपूजाहितंकर्मशक्तिश्चशिवपूजने ॥ ५१ ॥ एतच्चास्तुममेतिश्चगतिश्चास्तु शिवार्च
ने ॥ अग्निरिंद्रश्चमेसोमः सविताचसरस्वती ॥ पूषाबृहस्पतिर्मित्रः स्तथावरुणश्चमे ॥ अश्विनौचममेस्थानतिष्ठतां सर्वदागृहे ॥ ५२ ॥ म रामः
रुतश्च प्रसंपंतु विश्वेदेवाश्चमेगृहे ॥ तथाहावरागानेतान्यग्नींद्रादिसुरान्शिव ॥ महद्यान्कुरुविश्वेशादक्षान्मह्यं कुरुकर्मणि ॥ अंतरिक्षंचप ९८
रुतश्च प्रसंपंतु विश्वेदेवाश्चमेगृहे ॥ तदहावरागानेतान्यग्नींद्रादि
थिवी द्यौरयस्तु दिशाश्चमे ॥ मूर्धाप्रजापतिश्चास्तु ममवत्कृपयाशिव ॥ ५३ ॥ अंशुश्चरश्मिरस्थस्तुमेदाभ्योधिपतिश्चमे ॥ उपांशुरंतयोमे
श्चममस्यादैंद्रवायवः ॥ ५४ ॥ मैत्रावरुणश्चास्तु तथैवास्तुममाश्विनः ॥ प्रतिप्रस्थानशुक्रोचमंथीचाग्रयणश्चमे ॥ ५५ ॥ वैश्वदेवोध्रुव
श्चापितथावैश्वानरश्चमे ॥ ऋतुग्रहाश्चमेसंतु सातियाह्यश्च शंकर ॥ ५६ ॥ ऐंद्राग्नोवैश्वदेवश्चग्रहाः सोमपयोगिना ॥ तरुंथामरुत्व
तीयाश्चग्रहास्संतिसदापिमे ॥ माहेंद्रश्चतथादित्यः सावित्रश्चास्तुमेगृहे ॥ सारस्वतश्चपौष्णश्चतथापात्नीवतश्चमे ॥ सहारियो

दि धाताऽन्यविष्णुरप्यस्तु ॥ हे कर्मकरस्तु मे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

जनश्चारुक्ममेधश्चास्तु सर्वथा ॥ वर्हिर्वेदिर्धिष्णियाश्च स्रुचश्च चमसाश्च मे ॥१५॥ ग्रावाणः स्वरवः संतु तथैवोपरवाश्च मे ॥ निमेधि
षवणौ संतु ते द्रोणकलशाश्च मे ॥ वायव्यानि च मे संतु पूतभृच्चास्तु मे प्रभो ॥ तथैवाधवनीयश्च त्वदाग्नीध्रं च मे प्रभो ॥ अग्निधर्मश्च मे
कश्च सर्वः प्राप्यश्च मे प्रभो ॥५२+ हविर्धानं च मे स्वामिन् गृहाश्चैव सदश्च मे ॥ पुरोडाशाश्च मे स्वामिन् पचताश्च भवंतु मे ॥ तथैवावभृथ
संतु स्वगाकारश्च मे प्रभो +॥ अग्निश्च मे घर्मश्च पृथिवी द्यौरथादितिरस्तु मे ॥ मशाक्करीरंगुलयो दिशश्च विदिशाश्च मे ॥६५॥ तथा यज्ञेन कल्पंतां
मृक्च सामानि तथैव मे च तथा ॥ सोमाय जुश्च दीक्षा च तपश्चास्तु ऋतुश्च मे ॥ तहोरात्रयोर्वृष्ट्या व्रतं च नियमात्मकं ॥ बृहद्रथंतरे यज्ञेन क
स्पतां फालल्लोत्वन ॥६३॥ गर्भा वत्साश्च भगवन् त्र्यविश्चास्तु महेश्वर ॥ त्र्यवी च मे दित्यवाड् दित्यौही च सदाशिव ॥ पंचाविश्च महादे
वं पंचावी च त्रिलोचन ॥ त्रिवत्सश्च त्रिवत्सा च तुर्यवाडस्तु मे प्रभो ॥६४॥ तुर्यौही पष्ठवाड् चास्तु पष्ठौही च महेश्वर ॥ उक्षा वशा च ऋषभो
वेहानड्वांस्तथास्तु मे ॥ धेनुरथस्तु भगवन् सीरायाति मनोहरा ॥ यज्ञेन कल्पतामायुः प्राणो यज्ञेन कल्पतां ॥ अपानोपि सयज्ञेन व्या
मनसह कल्पतां ॥ चक्षुः श्रोत्रं च यज्ञेन मनसा सह कल्पतां ॥६७॥ वागात्मापि तथा यज्ञोप्येवं यज्ञेन कल्पतां ॥ त्वदधीनमिदं सर्वं तवेति
प्रार्थितं मया ॥६८॥ सर्वस्वतंत्रोसि महेश यस्मात्त्वमेव दातासि तव प्रियाः ॥ उक्ताश्चेता वक्ष्यमकेन देहितान च स्वतंत्रान् शिवपूज
काय ॥ तेतावदस्मद्गृहकर्मयोग्याः योगेन योगस्य किलान्वयोपि ॥ तेषां प्रदेयत्वविनिश्चयेन तान्देहि मह्यं शिवपूजकाय ॥ अत्रैव
दार्थाः प्रथितास्त्वदीयाः सदावदेयास्तव दानयोग्याः ॥ अहं शिवाराधनसक्तचित्तो कोवाम हन्यास्तिसदानयोग्यः ॥७१॥ दातापि देय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सति दानयोग्यं विहाय कस्मै प्रददाति भक्त्या ॥ विद्वानतो देहि महेश तान्मे लोके मदन्यस्त्वनकोपि पात्रं ॥ ७२ ॥ त्वद्दत्तमेतादृश भाग्य
मसत्त्व सादपञ्जलिरतो भवामि ॥ समर्द्दलेशापितदानभावो भवेत्भवेत्त्वसदृपजकस्य ॥ ७३ ॥ मन्येशंकर देवदेव भवता दातृत्वमन्या
हतं तेनाग्निमसुरवान्सुरानपि सदातानस्वतंत्रान्स्वतः ॥ मह्यं देहि मदिष्टयाचरमभीकुर्वे तु दृष्ट्यानि मे शक्तिर्यस्य यथा यथास्ति
भगवन्सर्वस्वं तन्मप्रभो ॥ ७४ ॥ महाप्रभुः शंभुरमासहायो दयामयो भक्तमयोपि दाता ॥ मातापितामे सहितं प्रदाता धाता विधाता परमे
तस्मै दृक् ॥ ७५ ॥ दयत्वेन विनिश्चितास्त्वव सुरा सर्वेपि वेदे रमी दातारं त्वक्त्वभाग्यमथापि लक्ष्मभयः समुज्जृंभते ॥ अस्माकं तु महाप्रभुर्भव
भवानेवेति चिंत्तमुहुः स्वानंदांबुधि वीचिकातिचपलं शैलविलासास्पदं ॥ ७६ ॥ ॥ इति श्रीस्कांदे महापुराणे हिमवत्खंडे शिव
रहस्ये तृतीयांशे शिवगौरीसंवादे नाम चतुस्त्रिंशोध्यायः ॥ ३४ ॥ ॥ नंदिकेश्वर उवाच ॥ इतित प्रार्थितान्सर्वांश्च महाप्रतिपा रामः ९९
दितान् ॥ वरान्ददौ महादाता सर्वदान्यशिरोमणिः ॥ १ ॥ ततः परं तु तन्नैव कुंभयोनिं तपोनिधिं ॥ शिवध्यानसुधाधारापरिपीतं ददर्श सः
२ ॥ सोपि दृष्ट्वा महादेवं सांबं सर्वसुरोत्तमं ॥ अतिसंतुष्टहृदयस्तुष्टाव परमेश्वरं ॥ ३ ॥ भर्गो देवस्य सवितुर्वरेण्यमिह धीमहि ॥ सभर्गो भगवा
न् शंभुः धियो यो नः प्रचोदयात् ॥ ४ ॥ गणा गणपतये नमो नमः सुरगणपतये नमो नमः ॥ खगपतिपतये नमो नमः ॥ नमो पशुपतये नमो नमः
नमस्ते सकलगणेशाय महादेवसुतात्मने ॥ विघ्नौघकारस्त्वमसि ब्रह्मणोप्यस्य पास्यते ॥ ६ ॥ नमामि ढुंढिं मदसिक्तगंडं हताघखंडं विधृताघशुं
डं ॥ स्वभक्तविघ्नान्निहरं प्रचंडं परास्परं यन्महतो महांतं ॥ ७ ॥ गणाधिपं गंडतलालिकोटिकोटीरकोटिध्वज निर्जितानुदेः ॥ संसेविताघ्रिप्रप

मामिसर्वेदाक विकवीनामुपमश्रवस्तमं ॥ ८ ॥ सिद्धिं दातुं बुद्धिं वृद्धिं शक्तं नित्यं गौरीपुत्रं ॥ स्कंदं वंद्यं वंदे वंदे सुब्रह्मण्यं सुब्रह्मण्यो
९ ॥ तारकासुरसंहारविहारस्वतुरं परं ॥ वंदे वंदारुमंदारं कुमारं पुष्करस्रजं ॥ १० ॥ अकस्मादस्मदीये न भाग्येन सुखदेन मे ॥ स्मरा
रातिस्मृति स्नावदभ्राद्दृष्टिरिवाजनि ॥ ११ ॥ ये वैदिकस्मार्त्तविधिप्रयुक्तक्रियाजलक्षालनधूतचित्ताः ॥ विभूतिरुद्राक्षविभूषणास्ते ह्या
मनर्घाताः शिवमाचरंति ॥ १२ ॥ सुरापारशिरोरत्नप्रभानीराजिताय ते ॥ महादेवाय शर्वाय सदसस्पतये नमः ॥ १३ ॥ भूतजातसमुत्प
त्तिहेतुभूताय सर्वदा ॥ सर्वदेवाग्निवंद्याय भूतानां पतये नमः ॥ १४ ॥ सर्वामराधिदेवाय देवाराध्यपदाय ते ॥ देवानां मातृमायासु पशूनां
पतये नमः ॥ १५ ॥ कालांतकाय शर्वाय महामृत्युंजयाय च ॥ भूतस्वर्गापवर्गाय जगतां पतये नमः ॥ मुनींद्रसुंदरापारमनः पद्माश्रयाय
च ॥ त्रिनेत्राय नमस्तुभ्यं क्षेत्राणां पतये नमः ॥ १७ ॥ नमस्त्रिलोकनाथाय नमः परतराय ते ॥ नमः शांताय भगवन्वनानां पतये नमः ॥ अ
योचित्तप्रविष्टाय प्रहृष्टाय सुरद्विषि ॥ प्रहृष्टायातिपुष्टाय पुष्टानां पतये नमः ॥ १९ ॥ महाभूताधिपतये भूतभीतिप्रदाय च ॥ भूतिभ
द्रप्रभूताय दिशां च पतये नमः ॥ विश्वमायाविदूराय विश्वाविश्वप्रियाय च ॥ विश्वेश्वराय सोमाय विश्वरूपाय वै नमः ॥ २१ ॥ घोरतत्पु
रुषेशानवामदेव सदाशिव ॥ अविद्याध्वांतसूर्याय सद्योजाताय वै नमः ॥ नमो भर्गाय भीमाय भगनेत्रहराय ते ॥ देवतासार्वभौमा
य नमो रुद्राय मीढुषे ॥ २३ ॥ सहस्रशिरसे तुभ्यं सहस्रचरणाय च ॥ नमः सहस्रहस्ताय सहस्राक्षाय मीढुषे ॥ २४ ॥ संसारघोररोग
स्त्रिनिवारणकराय ते ॥ नमस्ते भयबाधाय सहमानाय मीढुषे ॥ २५ ॥ समस्तवेदवेदांतवेद्यं विदितमव्ययं ॥ ध्येयस्वरूपं तं वंदे सदसस्प
२६ फालभास्वरनेत्राग्निसंदग्धत्रिपुराय ते ॥ नमः सुंदररूपाय सुमृडीकाय मीढुषे ॥ + २

तिमद्भुतं॥२६॥ सुरासुरगणाराध्यं दुराराध्यं दुरासदं॥ परमानंदरं वंदे सुगंधिं पुष्टिवर्धनं॥२७॥ तमेव भक्त्या हृदि भावयामो भ
वं भवानीरमणं भजामः॥ भवानिना मानिसुरा वदामो यतः प्रसूता जगतः प्रसूती॥२८॥ गौरीविहारप्रवरप्रजातस्वेदोदकामोदवि
जृंभितेन॥ उमासहायः समयः सभयः तोयेन जीवान्व्यवसर्ज भूम्यां॥२९॥ यत्र वतावद्गिरिराजकन्याविन्यस्तहस्तस्तनमस्तहस्तः
स एव तावद्व्यवसर्जतस्यां यद्वोषधीभिः पुरुषान्परांश्च॥३०॥ अशेषकालीनशिवार्चनेनयः सर्वदोषापहरो हरो मे॥ गौरीविहारादरतः
ससर्ज यद्देषभूतानि चराचराणि॥३१॥ भालाक्षदक्षयक्षादिशिक्षादक्षासलक्षितं॥ वंदे वंदे विरूपाक्षमक्षरं परमं पदं॥ शिवप्रभाव
